Be ever shed upon me,
Struggling and drowning(7), alas! as I am in the endless Ocean of Illusion

---

(1) Siddhâspada.

(2) This "mind" has a qualifying adjective viz :—"Aks*h*atasampadi" "of uninterrupted happiness." It is so because the Devî is dancing there.

(3) Shiva is Bhûteshvara or Bhûtanâtha. Bhûta, which in a general sense means "beings," specifically refers to the Spirits by whom Shiva is surrounded, and of whom He is Master.

(4) It is by the Devî's aid that Shiva is Parameshvara, for without Shakti He is nothing, and without Her life-giving energy and support cannot exist. As the Kubjikâ Tantra says: "Without their Shaktis the husbands are but Preta (inert corpses)." So also the Jnânâr*n*ava: "O beloved, pure Sadâshiva, without Shakti is without motion like a corpse, for without Shakti He can do nothing."

(5) Svâtmânam parirabhya. Literally, having embraced Himself. The Devî is, however, in a dualistic sense, His sacred half, and in reality one with Him and his own self (see Mahâ-nirvâ*n*a Tantra, Chap. I). Cf. Âtmaratipriya*h* (*Shat*chakra p. 64).

(6) Daivâdvichyutachandrachandanarasaprâgalbhyagarbhasravat. The meaning is not clear but Chandra (moon) seems to stand for the Vîja of Shiva (which it also means): and Chandanarasa (liquid sandal flow) issues from Devî. Therefore the union of Shiva and Shakti in the Sahasrâra appears to be indicated.

(7) Mohajaladhi-vyâhâra-viddha, lit: "pierced by the mockery of the ocean of illusion."

Without taste of the water of the Bliss of Brahman
Which devotion dispels the weight of anguish from numbers of Devas.

8

May the glory of Thy feet dark as a rainladen cloud,
Be ever in my heart
Dispelling by its lustre as of ten million suns
The darkness which overspreads my mind.
From its glittering womb were born the three Devatâs,
Who create, maintain, and destroy the world,
Whose substance is pure consciousness and bliss.

9

May(1) Devî Durgâ Who gives victory and happiness
Dispeller of fear, Victrix of fortresses and ill-fortune
Who had power to destroy the proud enemies of the Devatâs,
And Who strikes terror into the hearts of thousands (of Her foes)
Ever conquer!
She it was Who, having severed the head of the Asura Mahi*sh*a,
Crushed and killed under Her feet him who assumed the form of a buffalo
Now bellowing, now charging, and again retreating
And from whose mouth the Asura issued.

10

In the red ocean vast and surging
Danced the great shields weapons and streamers(2) of the enemy
(An ocean) clouded by the flight of discus
And the arrows of the heaving multitude of soldiers
There lay the heads of the proud and wicked Asuras
Broken and cut to pieces, tossed about by the storm of battle,
(The sight of which) sharpened the thirst and hunger of the birds of carrion.

---

(1) See Mârka*nd*eya Cha*nd*î vv. 38, 39.
(2) Châmara.

11

I meditate(1) upon Devî Mahi*sh*amardinî,
Rushing in frenzy now here, now there on that wondrous field of battle (for the slaughter of the enemies)
Attended by eight companion Mât*ri*s(2)
And on the Mantra and Badhû Vîja(3) in the lotus of eight petals(4).
Within the two horns of the fierce and terrible restless and challenging head
Bent low and slanting(5) of the maddened buffalo.

12

Let the Sâdhaka meditate on the dark Shivâ (Mahi*sh*amardinî),
Holding in Her hands discus, lance, axe, shield, arrow, bow, and trident,
Making the gesture(6) which dispels fear ;
Her mass of hair is like a bank of cloud entwined up on Her head,
Her face most formidable awes (Her foes)
Making even the defiant falter
Her laugh is loud and terrible.

13

O Devî ! such as in this manner
Meditate upon this Thy faultless form
Or upon Thee as Durgâ or other form of Thine
Worshipped by Indra and other Devas,
To them it is given to attack the cities of their foes,
And conquering their enemies, to gain a kingdom ;
They too, acquire the nectar of the knowledge of poesy,
And power to arrest, banish, and slay(7).

---

(1) Reading Smare for Vare in text.

(2) The Devîs so called *vide ante* the Kar*n*ejapa-Stotra.

(3) Strîng the Mantra may be said with this or the Târa (Ong) Mâyâ (Hrîng) Kâma (Kling) or Vâgbhava Vîja (Aing).

(4) On the petals are the eight syllables Mahi*sh*mardinî svâhâ : "Salutation to the Devi slayer of Mahi*sh*a"

(5) The buffalo when charging puts its head askew. The Mantra is thought of as placed between the two horns.

(6) The Abhayamudrâ.

(7) Stambhanam, Uchchâ*t*anam. and Mâra*n*am ; three of the Tântrik *Shat*karma.

14

Whosoever reads or hears this Hymn
Made by me in rapt meditation upon Thy lotus feet,
Wherein is said Thy Kula worship and Mantra in hidden form(1)
In the palms of the hands of all such
Are forthwith wealth, fulfilment of desire and liberation.
O Mother! salutation to Thee!
May Thou conquer!

In the concluding portion of this Chapter the Devî says that Her chief forms are represented by Mahi*sh*amardinî, Kâlî, and Tripurâbhairavî, the last being considered the primary manifestation (VII. 37). This work inculcates the worship of Yoginîs as a part of Kula-worship, on Kula-days (Kulavâra) and Kula-tithis, specially on the 14th day of the moon.

[The Kulavâras have been described in the Yâmalas from which they have been quoted in the Tantrasâra as follows " Tuesday and Friday are Kula days while Wesdnesday is both Kula and Akula, the rest being all Akula "(2) Again all Tithis with an uneven number are Akula; with an even number Kula with the exception of the second, sixth and tenth which are both Kula and Akula.](3)

The evening rite, consisting in the offering of food to jackals, is described at length. The Devî towards the end says " Thou art the Guru of all the Tantras and neither I nor Hari. Therefore Thou art the Revealer of the Tantras. I entered into Thy body (as Shakti) and thereby Thou didst become the Lord (Prabhu). There is none but Myself who is the Mother to create (Kâryyavibhâvinî) (4) and therefore it is when creation

(1) The Mantra Mahi*sh*amardinî svâhâ may be spelt out from the first six verses from the following words which respectively commence them. Machchitte (Ma) Hitvâ (Hi) Cha*nd*î tadvi*sh*ayântara (*Sh*a) Mannindâ (Ma) Nirddi*sht*o'smi (Rdini) Svâtmânam and not âtmânam as given in the text (Svâ) and Hâhâ (Hâ).

(2) Ravichandrau guru*h* saurish chattvârashchâkulâ matâ*h*
Bhaumashukrau kulâkhyau tu budhavâra*h* kulâkula*h*. See Pa*t*ala VII. 38.

(3) Dvitîyâ dashamî sha*shth*ì kulâkulamudâh*ri*tam
Vi*sh*amâshchâkulâ*h* sarvâ*h* she*sh*âshcha tithaya*h* kulâ*h*
Similarly all Nak*sh*atras with an even number are Kula :
Vâru*n*ârdrâbhijinmûlang kulâkulamudâh*ri*tam
Kulâni samadhi*shn*yâni she*sh*aibhâny akulâni cha.

(4) That is She has the disposition to act or to carry out what He wills. She alone has Kart*ri*tva for the Father as efficient cause does not act, but the Mother in whose womb the seed of the world is sown alone does so

takes place that sonship is in Thee. Thou alone art the Father who wills what I do (Kâryyavibhâvaka) and none else.

> Mâng vinâ jananî kâpi naiva kâryyavibhâvinî
> Ata*h* kâryye samutpanne putratvang tvayi vartate
> Tvâng vinâ janaka*h* ko'pi naiva kâryya-vibhâvaka*h*
> Atastvameva janako nâstyanyo'pi kathanchana

"At times Thou art the father ; at others the son ; at times Thou art the Guru ; at others the disciple. By the union of Shiva and Shakti creation comes (Shivashakti-samâyogât jâyate s*ri*-*sht*ikalpanâ). As all in this universe is both Shiva and Shakti (Shivashaktimaya) therefore, Oh Maheshvara ! Thou art in every place and I am in every place. Thou art in all and I am in all."

Varendra Research Samiti, Rajshahi,
August 1915.

A. K. Maitra.

कुलचूड़ामणितन्त्रम् ।

श्रीआर्थार एवेलनेन प्रवर्त्तितम् ।

श्रीअक्षयकुमारमैत्रेण पर्य्यवेक्षितम् ।

श्रीगिरीशचन्द्रवेदान्ततीर्थेन सम्पादितम् ।

कलिकातानगर्य्यां

संस्कृतयन्त्रे

श्रीउपेन्द्रनाथचक्रवर्त्तिना मुद्रितम् ।

लण्डनराजधान्यां लुज्याक् एण्ड कों कर्त्तृकेण

प्रकाशितम् ।

कलिकातानगर्य्यां ३० नं, कर्णओयालिसष्ट्रीटस्थसंस्कृतप्रेस-

डिपजिटरीभवने प्राप्तव्यम् ।

खृः १९१५ ।

आदर्शपुस्तकविवरणम् ।

पुस्तकद्वयमवलम्ब्यास्य सङ्कलनं कृतम् । तत्र "क"- संज्ञकं पुस्तकं श्रीयुक्तेन अटलविहारिघोषमहोदयेन संगृहीतम् । "ख"- संज्ञकं कृष्ण-नगराधिपतेः सुगृहीतनामधेयस्य श्रीलश्रीयुक्तमहाराजक्षौणीशचन्द्ररायवाहा-दुरस्य पुस्तकालयादानीतम् । उभयमेवाशुद्धिबहुलम् च्युतिदुष्टञ्च ; अत उभयस्मादेकैकस्येनांशविशेषमवलम्ब्य समीचीनतया प्रतिभातः पाठो मूले न्यवेशि । पाठान्तरन्त्वधस्तान्निहितम् । बुद्धिमान्द्यादत्र पाठविचारणायां मया यत् स्खलितं तत्तु तन्त्रार्थरसिकैः सुधीभिः सुविचार्य्य प्रदर्शनीयम् । अवश्यम्भाविनि स्खलने परिज्ञाते तु तस्य प्रतिविधानं सम्भवि ।

सविनयप्रार्थनेयं श्रीपूर्णानन्दवंशकरीर-
गिरिशचन्द्रशर्म्मणः ।

कुलचूड़ामणितन्त्रम्

प्रथमः पटलः ।

—:**:—

ओँनमः शिवाय । *

श्रीभैरव उवाच ।

असंख्या त्रिपुरादेवी असंख्याता(१) च कालिका ।
वागीश्वरी तथासंख्या तथा च सुकुलाकुला (२) ॥ १ ॥
मातङ्गिनी तथा पूर्णा विमला चण्डनायिका ।
त्रिपुरैकजटा दुर्गा या चान्या कुलसुन्दरी ॥ २ ॥
वैष्णवं गाणपत्यञ्च महासौरमतं तथा ।
शैवं शाङ्करजात(३)ञ्च यत्किञ्चिद् भूतसम्भवम् ॥ ३ ॥
चतुःषष्ठी च तन्त्राणि (४) मातृणामुत्तमानि च ।
महासारस्वतञ्चैव(५) योगिनीजालसम्बरम् ॥ ४ ॥
तत्त्वसम्बरकं नाम भैरवाष्टकमेव च ।
बहुरूपाष्टकं ज्ञानं यामलाष्टकमेव(६) च ॥ ५ ॥

---

* ख-पुस्तके तु "नमस्तस्यै ।
गुरुगौर(व)सामग्री-व्यग्रितेन्द्रियसञ्चयः ।
जगदम्बा-पदाम्भोजे रोलम्बोऽहं दिवानिशम्" ।
इत्यधिकमुपक्रमे दृश्यते ।

(१) असंख्या चैव कालिका । ख । (२) तथा तद्वत् कुलाकुल । ख ।
(३) शङ्करजातञ्च । ख । (४) चतुःषष्टिश्च तन्त्राणां । ख ।
(५) महामाया-सम्बरञ्च । ख । (६) एतत् श्लोकार्द्धं ख पुस्तके नास्ति ।

तन्त्रज्ञानं वासुकिञ्च महासम्मोहनं तथा ।
महासूक्ष्मं महादेवि ! वाहनं वाहनोत्तरम् (७) ॥ ६ ॥
हृद्भेदं मातृभेदञ्च गुह्यतत्त्वञ्च कामिकम् (८) ।
कलापकं (९) कलासारं तथान्यत् कुब्जिकामतम् ॥ ७ ॥
मायोत्तरञ्च वीणाख्यं त्रोड़लं त्रोड़लोत्तरम् (१०) ।
पञ्चामृतं रूपभेदं भूतडामर मेव च (११) ॥ ८ ॥
कुलसारं कुलोड्डीशं तन्त्री (न्त्रं) विश्वात्मकं यथा ।
सर्व्वज्ञानात्मकं देवि ! महापितृमतं (१२) तथा ॥ ९ ॥
महालक्ष्मीमतं देवि ! सिद्धयोगेश्वरीमतम् (१३) ।
कुरूपिकामतं देवि ! रूपिकामत मेव च ॥ १० ॥
सर्व्ववीरमतं देवि ! विमलामत मुत्तमम् (१४) ।
पूर्व्व-पश्चिम-दक्षञ्च उत्तरञ्च निरुत्तरम् (१५) ॥ ११ ॥
तन्त्रं वैशेषिकं ज्ञानं शिवावलिमथापरम् (१६) ।
अरुणेशं मोहनेशं (१७) विशुद्धेश्वरमेव च ॥ १२ ॥
एवमेतानि तन्त्राणि (१८) तथान्यान्यपि कोटिशः ।
श्रुत्वा देवि ! न कुत्रापि जातानन्दासि भैरवि ! ॥ १३ ॥

---

(७) महासंख्यं महादेवं वातुलं वातुलोत्तरम् । ख ।

(८) गुह्यतन्त्रञ्च कामुकम् । ख । (९) कलापादं । ख ।

(१०) लम्बोत्तरञ्च वीणाख्यं तोड़लं तोड़लोत्तरम् । ख ।

(११) पञ्चामृतं पञ्चभेदं भूतोड्डामर मेव च । ख ।

(१२) सर्व्वज्ञानमयं देवि ! महापिचुमतं तथा । ख ।

(१३) योगीश्वरीमतम् । ख । (१४) विमलामत मेव च । ख ।

(१५) निरुत्तरम् । ख : (१६) वीरावलि मथापरम् । ख ।

(१७) मोहिनीशं । ख ।

(१८) "चतुःषष्टिश्च तन्त्राणां मातृणामुत्तमानि च" इत्यतःपरं वामकेश्वरतन्त्रे "महामाया शम्बरञ्च" इत्युपक्रम्य चतुःषष्टितन्त्रनामान्युक्तानि । तत्रत्य पाठोऽन्तराऽन्तरा किञ्चिदन्यथा लक्ष्यते, सोऽयं पाठो महाजनपरिगृहीततया समीचीनतया च ध्रियते व्याख्यायते च ।

"महामाया शम्बरञ्च योगिनीजाल-शम्बरम्। तत्त्व-शम्बरकं चैव भैरवाष्टकमेव च॥

अत्र पूर्व्वार्द्धे चत्वारि तन्त्राणि—महामाया १ शम्बर २ योगिनीजाल ३ शम्बररूपाणि। शम्बरस्य द्विधोल्लेखस्तु शम्बर-बृहत्शम्बरत्वेन व्याख्येयः। कश्चित्तु योगिनीतन्त्रं जालशम्बरमित्येवं व्याचष्टे। तत्त्वशम्बरकमेकं भैरवाष्टकमपर मित्यपरार्द्धोक्ते द्वे इति षट् तन्त्राणि।

"असिताङ्गो रुरु श्चण्डः क्रोध उन्मत्त एव च।

कपाली भीषणश्चेति संहारश्चाष्ट भैरवा"॥

इत्युक्ताष्टभैरवविषयकं तन्त्रं भैरवाष्टक नाम्ना प्रसिद्धम्।

"बहुरूपाष्टकं चैव यामलाष्टक मेव च।

चन्द्रज्ञानं वासुकिं च महासंमोहनं तथा॥"

बहुरूपाष्टकं शिवदूतीसहितानां सप्तानां मातॄणां अष्टौ तन्त्राणि बहुरूपतन्त्रनाम्नाभिहितानि। यामलाष्टकम्—"ब्रह्मयामलं १ विष्णुयामलं २ रुद्रजामलं ३ लक्ष्मीयामलं ४ उमायामलं ५ स्कन्दयामलं ६ गणेशयामलं ७ ग्रहयामल ८ श्चेत्यष्टसंख्यकम्। भास्करस्तु ग्रहयामल स्थाने जयद्रथयामलं पपाठ। चन्द्रज्ञान-वासुकि-महासंमोहनानि त्रीणि इत्यस्मिन् श्लोके ऊनविंशति तन्त्राण्युक्तानि।

महोच्छुष्मं महादेव! वातुलं वातुलोत्तरम्। हृद्‌भेदं तन्त्रभेदञ्च गुह्यतन्त्रञ्च कामिकम्॥

कलावादं कलासारं तथान्यत् कुब्जिकामतम्। तन्त्रोत्तरञ्च वीणाख्यं त्रोतलं त्रोतलोत्तरम्॥

पञ्चामृतं रूपभेदं भूतोड्डामरमेव च। कुलसारं कुलोड्डीशं कुलचूड़ामणिं तथा॥

सर्व्वज्ञानोत्तरं देव! महाकालीमतं तथा। महालक्ष्मीमतञ्चैव सिद्धयोगेश्वरीमतम्॥

कुरूपिकामतं देवरूपिकामतमेव च। सर्व्ववीरमतञ्चैव विमलामतमुत्तमम॥

अत्र पञ्चश्लोक्या अष्टाविंशति-तन्त्राणि संख्यातानि यथा—महोच्छुष्म १ वातुल २ वातुलोत्तर ३ हृद्‌भेद ४ तन्त्रभेद ५ गुह्यतन्त्र ६ कामिक ७ कलावाद ८ कलासार ९ कुब्जिकामत १० तन्त्रोत्तर ११ वीणाख्य (वीणातन्त्र) १२ त्रोतल १३ त्रोतलोत्तर १४ पञ्चामृत १५ रूपभेद १६ भूतोड्डामर १७ कुलसार १८ कुलोड्डीश १९ कुलचूड़ामणि २० सर्व्वज्ञानोत्तर २१ महाकालीमत २२ महालक्ष्मीमत २३ सिद्धयोगेश्वरीमत २४ कुरूपिकामत २५ देवरूपिकामत २६ सर्व्ववीरमत २७ विमलामतानि।

"पूर्व्वपश्चिमदक्षं च उत्तरं च निरुत्तरम्। तन्त्रं वैशेषिकं ज्ञानं वीरावलि तथापरम्॥

अरुणेशं मोहिनीशं विशुद्धेश्वर मेव च"॥ अनेन सार्द्धश्लोकेन एकादश-तन्त्रानि उक्तानि—यथा—पूर्व्वाम्नाय १ पश्चिमाम्नाय २ दक्षिणाम्नाय ३ उत्तराम्नाय ४ निरुत्तरतन्त्र ५ वैशेषिकतन्त्र ६ ज्ञानार्णवतन्त्र ७ वीरावलितन्त्र ८ अरुणेशतन्त्र ९ मोहिनीशतन्त्र १० विशुद्धेश्वर ११ नामकानि। शक्तिप्रधानतन्त्राणां मध्ये एतानि चतुःषष्टितन्त्राणि उत्तमानि श्रेष्ठानि ज्ञेयानीत्याकूतम्।

तत्कथं वद सुश्रोणि ! मयि त्वत्पादवर्त्तिनि (२०) ॥ १४ ॥

देव्युवाच । (२१)

शृणु देव ! परानन्द परापरकुलात्मक !
मन्मायामुद्रिताशेष-तत्त्वज्ञानकुलार्णव ! ॥ १५ ॥
अहं प्रकृतिरूपा चेच्चिदानन्दपरायणा (२२) ।
क्व ब्रह्मा क्व हरिः शम्भुः क्व देवः क्व मनोजपः (२३) ॥ २६ ॥
क्व सृष्टिः क्व स्थिति(२४)र्व्वापि क्व वा संहृतिभूमिका ।
क्व रागः क्व सुखं दुःखं क्व मुक्तिः क्व च साधुता ॥ १७ ॥
आस्तिक्यं क्व नु नास्तिक्यं क्व गुरुत्वं क्व शिष्यता ।
माययाच्छाद्य चात्मानं त्रिधा भूत्वा (२६) मदोन्मुखी ॥ १८ ॥
पराकुलरसोन्मादमोदिनी च विकारिणी (२७) ।
पञ्चभूतानि लिङ्गानि चैकोत्तर-शतानिच ॥ १९ ॥
ब्रह्मादिभूर्भुवः स्वस्वभावव्यक्ति रजायत (२८) ।
सर्व्वेष्याविर्भवन्त्यत्र ततो भावादिकल्पना ॥ २० ॥
शिवशक्तिप्रभेदेन गुणोत्पत्तिस्तु जायते ।
सर्व्वे ब्रह्मादयो यूयं(२९) मदंशा भावसम्भवाः ॥ २१
परस्पराविभिन्नाश्च(३०) तत्त्वमन्त्र-समाकुलाः(३१) ।
पञ्चत्वं प्रापयित्वापि निर्व्वाणपदलालिताः ॥ २२ ॥

---

(२०) तत् कथं वद देवेशि ! मायाश्च पादवर्त्तिनि । क । (२१) श्रीदेव्युवाच ख ।
(२२) परायणी । क । (२३) क्व देवः कमलोद्भवः । ख ।
(२४) क्व सृष्टिः क्व स्थितिरपि । क । (२५) क्व यागः । क ।
(२६) विषयेहं । ख । (२७) मोदिनी क्लेशहारिणी । ख ।
(२८) ब्रह्मादि भूर्भुवः स्वः स्वः स्वभावव्यक्ति जायतः । ख ।
(२९) सर्व्वे ब्रह्मादयो ये ये । क । (३०) परस्पर-विभिन्नाश्च । ख ।
(३१) निर्व्वाणपदमानिता । क ।

पुनराविर्भवन्त्येते प्रकृतिः परतः पुमान् ।
अहङ्कारः पञ्चमात्राः सत्त्वं चाथ रजस्तमः (३२) ॥ २३ ॥
एतन्मात्रात्मकं विश्वं नष्टं चाविर्भवत्यपि (३३) ।
यदि मां विद्धि सर्व्वज्ञ ! क्व चाम्नायाः क्व याजनम् (३४) ॥ २४ ॥
न विद्धि माञ्चेत् सर्व्वज्ञ ! क्व चाम्नाया क्व याजनम्(३५) ।
नारीरूपं समास्थाय सृष्टिसारं सदात्मकम् ॥ २५ ॥
भवन्तं भवयोगस्थं गुरुं ज्ञातुं(३६) विजृम्भिता ।
एतावतापि देवेश ! मम तत्त्वं न जायते ॥ २६ ॥

देव्युवाच ।

शृणु पुत्र ! परानन्द-परिचर्य्याविशारद ! ।
योगनिर्म्मुक्तकानुष्ठ उपायः कथ्यते मया ॥ २७ ॥
सर्व्वतन्त्रैकसारञ्च सर्व्वदेवनमस्कृतम् ।
सर्व्वसार्व्वज्ञ(ज्ञत्र) दं (३७) गुह्यं तत्त्वबोध-प्रबोधकम्(३८) ॥ २८ ॥
पापपुण्यैकनाशार्हं भोग-(३९) मुक्तिप्रदायकम् ।
सर्व्वाश्चर्य्यमयं वत्स ! विदुषामपि मोहनम् ॥ २९ ॥
नानार्थप्रसवप्राज्ञ(४०) नानार्थसंकुलाकुलम् ।
सदाचार्य्य-परिज्ञम(४१) (ज्ञातं) सच्छिष्य-परमास्पदम् ॥ ३० ॥
सर्व्ववादि-सदाचारं सर्व्ववादि-विगर्हितम् ।

---

(३२) सत्त्वं वा राजसं तमः । ख ।
(३३) एतत्तत्त्वात्मकं ज्ञात्वा ब्रह्मचारी भवत्यपि । ख ।
(३४) क्वाम्नायाः क्वच याचनम् । ख ।
(३५) न वेत्ति चेद्धि सर्व्वज्ञ । क्वाम्नायाः क्वच याचनम् । ख । (३६) ज्ञातं । ख ।
(३७) योगनिर्म्मुक्तकानुष्य । ख । (३८) सर्व्व-सर्व्वज्ञ-संगुप्तं । क ।
(३९) भक्तिमुक्ति । क । (४०) नानार्थ-प्रसविप्रज्ञ । ख ।
(४१) सदाचार्य्य-परिज्ञानम् । ख ।

न मया विष्णवे प्रोक्तं न धात्रे गणपाय न ॥ ३१ ॥
गोपनीयन्तु(४२) हृदये यत्नतः परिपालय ।
एतत्तन्त्रं विना वत्स ! नाधिकारोऽस्ति यद्यपि(४३) ॥ ३२ ॥
कुलाचारे तथा वत्स ! ज्ञानशुद्धि (द्धिं) वदाम्यहम् ।
साधकः प्रातरुत्थाय कुलवृक्षं प्रणम्य च ॥ ३३ ॥
मूलादिब्रह्मरन्ध्रान्तं कुलं ध्यात्वा गुरुं स्मरेत्(४५) ।
प्रह्लादानन्दनाथाख्यं सनकानन्दमेव च ॥ ३४ ॥
कुमारानन्दनाथञ्च वशिष्ठानन्दनाथकम्(४६) ।
क्रोधानन्द सुखानन्दौ ज्ञानानन्द मतःपरम्(४७) ॥ ३५ ॥
बोधानन्द मथाभ्यर्च्य ध्यायेत् कुलमयोपरि(४८) ।
महारसरसोल्लास-हृदयानन्द(४९) लोचनाः ॥ ३६ ॥
कुलालिङ्गन-संभिन्नचूर्णिताशेष-तामसाः(५०) ।
कुलषिष्योपरिकृपा(५१) पूर्णान्तःकरणोद्यताः ॥ ३७ ॥
वराभययुताशेष-कुलतन्त्रार्थवेदिनः(५२) ।
एवं कुलगुरुं नत्वा विसृज्य कुलमातृकाम्(५३) ॥ ३८ ॥
कुलस्थानं समालिङ्गय स्नानार्थं तीर्थमाश्रयेत् ।
शाक्तं कुलगुरुं वत्स ! कथितञ्च सुखावहम्(५४) ॥ ३९ ॥

---

(४२) गोपनायेतु (क ।
(४३) एतन्मन्त्रं विना वत्स नाधिकारः सुरैरपि क । (४४) कुलाचारं । क ।
(४५) मूलादि-ब्रह्म-पर्य्यन्तं गुरुं ध्यात्वा गुरुं स्मरेत् ।
(४६) कुमारानन्दनाथाख्यं वशिष्ठानन्दमेव च ।
(४७) क्रोधानन्दौ शुकानन्दौज्ञानानन्दं ततः परम् । क ।
(४८) कुलसुखोपरि । ख । (४९) हृदयाघूर्णलोचनः । ख ।
(५०) चूर्णिताशेषतामताः । क । (५१) कुलशिष्योपरिकुलः । क ।
(५२) वादिनः । क । (५३) विसृष्ट कुलनायकः । ख ।
(५४) कथितं कुलसुखावहम् । क ।

रहस्य मत्भूतं वत्स ! गोप्तव्यं पशुशङ्कटे ।
कुलनाथं परित्यज्य ये शाक्ताः कुलसेविनः (५५) ॥ ४० ॥
तेषां दीक्षा च यागश्च अभिचाराय कल्पते ।
तस्मात् सर्व्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् ॥ ४१ ॥
कुलीनः सर्व्वविद्याना मधिकारीति गीयते ।
दीक्षा प्रभुः स एवात्र सर्व्वमन्त्रस्य नापरः ॥ ४२ ॥

इति कुलचुड़ामणौ प्रथमः पटलः ।

---

(५५) परसेविनः । ख ।

द्वितीयः पटलः ।

देव्युवाच ।

अथ वक्ष्यामि ते(१) वत्स ! स्नानं कुलसुखावहम् ।
कृष्णरक्तहरिन्नीला विविधा मम मूर्त्तयः ॥ १ ॥
तत्र यः कुलगः शिष्यः स तद्रूपं परामृशन्(२) ।
दिवं सर्व्वं(३) मथोर्व्वीञ्च पातालं भूतसम्भवम् ॥ २ ॥
आचान्तः कुलदर्भेण सदर्भकुलपुष्पकम्(४) ।
कुलपात्रे सदूर्व्वञ्च सतिलं सजलं तथा(५) ॥ ३ ॥
गृहीत्वा कुलदेवस्य प्रीतये स्नान माचरेत् (६) ।
कृतसङ्कल्प एवादौ कुलचक्रं जले न्यसेत् ॥ ४ ॥
कुलमूलं समानीय कुलमुद्राङ्कुशेन च(७) ।
कुलतीर्थाणि तत्रैव समावाह्य कुलात्मकम्(८) ॥ ५ ॥
तत्तोयञ्च त्रिधा पीत्वा त्रिधा च प्रोक्षणं तनोः ।
कुलमूलाय देवाय त्रिधार्घ्यं परिकल्प्य च(९) ॥ ६ ॥
देवान् पितॄन् ऋषींश्चैव तर्पयेत् कुलवारिणा ।
कुलात्मकान् पुनर्ध्यात्वा कुलदेवांस्तु तोषयेत्(१०) ॥ ७
भैरवीतन्त्र एवात्र तेषां सङ्ख्या (संज्ञा) च विद्यते(११) ।
भैरवाय च देवाय(१२) भैरवेण च कर्त्तृणा ॥ ८ ॥

---

(१) अथ वक्ष्याम्यहम् । ख ।
(२) परायणम् । ख ।
(३) दिव्यं सर्व्वां । ख ।
(४) दर्भञ्च कुलपुण्ड्रकः । क ।
(५) ततः । ख ।
(६) मारभेत् । क ।
(७) कुलमूलात् समानीय कुलपात्रं कुलेन च । ख ।
(८) समावाह्याधिवात्मकम् । क ।
(९) कुलसूर्य्याय देवाय त्रिधार्घ्यं परिकल्पयेत् । क ।
(१०) कुले च परिशोधयेत् । क ।
(११) तेषामङ्गा विद्यते । इति भ्रान्तः पाठः । ख ।
(१२) डमाय । क ।

भैरवाख्यं प्रदातव्यं मन्त्रमुच्चार्य्य पूर्व्वतः(१३) ।
दातृदानगृहीतञ्च ततो लिङ्गानुरूपतः ॥ ९ ॥
भैरवी भैरवात्मानं भावये त्तदशेषतः (१४) ।
श्राद्धे विवाहे दाने च स्नाने चाङ्ग-प्रपूजने ॥ १० ॥
एवं चिन्तापरे देव ! प्रसीदामि न संशयः ।
तत स्तृप्ता तदाशेषलोकान् प्रीणामि तत्त्वतः ॥ ११ ॥
उत्थाय कुलवस्त्रे द्वे परिधाय कुलेन च ।
तिलकं कुलरूपञ्च कृत्वाचम्य समाप्य च ॥ १२ ॥
कुलपीठं समारुह्य कुलदेवस्य पूजनम् (१५) ।
द्वारदेशे ततो गीतनृत्यवाद्यादि-तोषितः ॥ १३ ॥
कुलभूतं समुत्(१६)सार्य्य कुलस्थानं प्रपूजयेत् ।
कुलासनं तत्र (१७) क्षिप्त्वा तदभ्यर्च्च्य यथासुखम् ॥ १४ ॥
कुलासनं ततो वद्ध्वा गुरुपूजाक्रमेण (१८) च ।
आत्मशुद्धि-भूमिशुद्धि-देहशुद्धि-विभेदतः (१९) ।
कृत्वाचार्य्यं ततो विद्वान् कुर्य्यात् कुलविचेष्टितम् ।
दीक्षिताभिः सुशीलाभि र्युवतीभिः कुलात्मभिः ॥ १६ ॥
देवतागुरुभक्ताभिः संयुतं (२०) यागभूमिषु ।
नानाविधानि पुष्पानि गन्धानि विविधानि च ॥ १७ ॥
कर्पूरजातिधूपादिवासितं पटवासितम् ।
ताम्बूलं (२१) देयद्रव्यञ्च धूपदीपादिकञ्च यत् ॥ १८ ॥
सर्व्वालङ्कारभूषाभिर्भूषितः कौलिक स्तदा (२२) ।
मूलविद्याजप्ततोयैः प्रोक्षितं (२३) स्थापये त्ततः ॥ १९ ॥

---

(१३) पूर्व्वकम् । ख । (१४) भावयेत् यदशेषतः । क । (१५) सर्व्वदेवस्य पूजनम् । क ।
(१६) समुत्सार्य्य । क । (१७) ततः । क । (१८) कुलासनं तत्रवद्ध्वा कुलपूजाक्रमेण च । ख ।
(१९) आत्मशुद्धिं पीठशुद्धिं देहशुद्ध्यादिभेदतः । ख । (२०) सञ्चितं । ख ।
(२१) देवद्रव्य । ख । (२२) कौलिकीं तदा । ख । (२३) प्रोक्षयेत् । ख ।

सर्व्वं स्वदक्षिणे स्थाप्यं वामे चार्घ्यं निवेशयेत् ।
पश्चिमे देवतायाश्च कुलद्रव्याणि धारयेत् (२४) ॥ २० ॥
कुण्डगोलोद्भवै र्द्रव्यैः स्वयम्भुकुसुमेन च (२५) ।
रोचनालाक्षयारक्तैः (२६) कुङ्कुमारुणचन्दनैः ॥ २२ ॥
यन्त्रं कृत्वा तत्र पूजां कृत्वा च जपमाचरेत् (२७) ।
यथाशक्ति मनुं जप्त्वा स्तुत्वा देवीं विसर्जयेत् ॥ २२ ॥
तास्ताः प्रदक्षिणीकृत्य निजा वाप्यन्ययोषितः ।
कुलामृतरसं पूर्व्वं (२८) गुरवे विनिवेदयेत् (२९) ॥ २३ ॥
योषित स्तवशेषन्तु स्वात्मन्येव नियोजयेत् ।
ब्रह्मरन्ध्रे गुप्तस्थाने यन्त्रलेपन्तु धारयेत् ॥ २४ ॥
नास्तिकेभ्यो न मूर्खेभ्यो न पशुभ्यो न वा द्विजे ।
कुलीनाय च दातव्य मथवा जलमध्यतः (३०) ॥ २५ ॥
ततः सोऽहमिति ध्यात्वा वैष्णवाचारतत्परः ।
हरिनाम्ना जातभावो भङ्ग्यन्वितविचेष्टितः (३१) ॥ २६ ॥
चौरवत् प्रविशेदेकः सदा सङ्गविलम्बितः (३२)
याममात्रे (३३) गते रात्रौ कुलगेहं ततः पुमान् ॥ २७ ॥
प्रसून-तूलिकामध्ये (३४) स्थित्वा कुलपरायणः ।
कुलयन्त्रं साध्यनाम्ना सङ्कुलं कुलचक्रके (३५) ॥ २८ ॥
स्वनामाद्यङ्कितं कृत्वा कुलाचारं समाचरेत् ।
स्वशक्त्या परशक्तिञ्च समानयति साधकः ॥ ३९ ॥

---

(२४) धापयेत् । ख ।
(२५) स्वयम्भुकुसुमादिभिः । क ।
(२६) लाक्षयालक्तैः । क ।
(२७) जपमारभेत् । क ।
(२८) पूर्णं । ख ।
(२९) तदन्तरम् । ख ।
(३०) जलमाश्रयेत् । ख ।
(३१) भग्नाखिल विचेष्टितः । क ।
(३२) रविवद्विहरेदेकः सदासङ्गविलङ्घितः । ख ।
(३३) याममात्रं गते । ख ।
(३४) भूमिकामध्ये । ख ।
(३५) मूलचक्रं साध्यनामटङ्कितं कुलचक्रके । क ।

परशक्त्याकर्षणञ्च शृणु वत्स ! समाहितः ।
निजकान्तां समानीय सुशीलां सुयशस्विनीम् ॥ ३० ॥
कुलभक्तं गुरुं प्राप्य दीक्षयेत् कुलदीक्षया (३६) ।
परानन्दरसाघूर्णलोचनां कुलजां सतीम् ॥ ३१ ॥
ताम्बूलग्रासपूरास्यो गुरुरक्षोभितः सुधीः (३७) ।
निजपुत्रीवदाचर्य्य तद्भालपट्टके लिखेत् ॥ ३२ ॥
शक्तिचक्रं त्रिरावृत्त्या लिखेत् कामकलान्ततः (३८) ।
तन्मध्ये देयमन्त्रेण दर्भितं नामलाञ्छितम् ॥ ३३ ॥
तत्र देवीं समावाह्य ध्यात्वा देवीं प्रपूज्य च (३९) ।
ततस्तत् (४०) पुत्रिकाकर्णे ऋषिच्छन्द-समन्वितम् ॥ ३४ ॥
मूलमन्त्रं त्रिरावृत्य (४१) कथयेद्वामकर्णके ।
अद्य प्रभृति पुत्रि ! त्वं कुलपूजार्चने रता ॥ ३५ ॥
स्व (सु) कुलाज्ञां (४२) समादाय लज्जालस्यविवर्जिता ।
यथोपदिष्ट (४३) विधिना समेवस्यं (श्यं) समानय ॥ ३६ ॥
इत्यनुज्ञां गुरोर्लब्ध्वा प्रणमेद्दण्डवद्भुवि ।
त्राहि नाथ ! कुलाचार-पद्मिनी-कुलनायक (४३) !
त्वत्पादाम्भोरुहच्छायां देहि मूर्द्ध्नि यशोधन ! ।
गुरवे दक्षिणां दत्त्वा ताम्बूलारुणलोचना ॥ ३८ ॥

---

(३६) कुलसक्तां गुरु प्राप्य दीक्षयेन्मूलविद्यया । क ।
(३७) ताम्बूलपरिपूर्णास्यो गुरु रक्षोभितःसुखी । ख ।
(३८) शक्तिचक्रं त्रिरावेष्ट्य तत्र कामकलां लिखेत् । ख ।
(३९) ध्यात्वा तत्र प्रपूजयेत् । ख । (४०) तत्रस्थः । क ।
(४१) त्रिधानूद्य । ख ।
(४२) नुकुलच्छा । क । प्रामादिकः पाठः ।
(४३) अथोपदिष्ट । ख । (४४) पद्मनायकः । क ।

स्वकुलं परमीक्षत्य यथाभीष्टं समाचरेत् ।
सा (अ)ङ्गावरणपूजादौ यदि न चमते कुलम् (४५) ॥ ३८ ॥
तदा मूर्द्ध्नि गुरुं ध्यात्वा कुलामृतरसेन च (४६) ।
तर्पयित्वा ततो (४७) देवं जपेन्मन्त्रं निराकुलम् ॥ ४० ॥

इति कुलचूड़ामणौ द्वितीयः पटलः ।

---

(४५) अङ्गावरण पूजाये यथा न चयते कुलम् । क । प्रामादिकः पाठः ।
(४६) रसेन तु । ख । (४७) तर्पयित्वा कुलं ध्यात्वा । ख ।

तृतीयः पटलः ।

—:**:—

देव्युवाच ।

अथ तद्रात्रिसमये स्वकुलं तूलिकोपरि (१) ।
वामभागे समासन्नं रक्तवस्त्रविभूषितम् ॥ १ ॥
स्वर्णालङ्कारभूषा(२)ढ्यं रक्तगन्धविभूषितम् ।
गन्धपुष्पधूपदीपवेष्टितं सुमनोहरम् ॥ २ ॥
सर्व्वश्रृङ्गारवेशाढ्यं स्फुरच्चकित-लोचनम् ।
जितामित (३) कुचद्वन्द्व विशाल-करिकुम्भकम् ॥ ३ ॥
ललाटयन्त्रमालिख्य साध्यनाम-विदर्भितम् ।
तत् स्कन्धे बाहुमादाय भङ्ग्याष्टतकुचावलम् ॥ ४ ॥
ताम्बूल-पूरितमुखं कुलं तदभिसंहितम् ।
कूलाकुल-जपं कृत्वा (४) समानयति तत्क्षणात् ॥ ५ ॥
(यन्नाम्ना लिखितं यन्त्रं तमानयति तत्क्षणात्) ।
शतयोजनदूरस्थां नदीपर्व्वतमध्यगाम् ॥ ६ ॥
द्वीपान्तरसहस्रेषु रक्षितां निगड़ादिभिः ।
पयोधरभरक्षुब्धमध्यमां लोललोचनाम् ॥ ७ ॥
नितम्ब-विम्बविध्वस्त-स्फुरज्जघनमण्डलाम् ।
साधकाकाङ्क्षिहृदयां विवरान्तः-प्रसर्पिणीम् ॥ ८ ॥
कपाट-लोहसन्नद्ध-प्राकार-विवरान्तरे (७) ।
साधकान्तः-समासीनां (८) देवता मिव चारिणीम् ॥ ९ ॥

---

(१) भूमिकोपरि । ख ; (*) बन्धनी-मध्यस्थं श्लोकार्द्धं ख पुस्तके नास्ति ।
(२) भूषाभि। ख। (३) जितामृत । क। (४) जलं (पं) कुर्य्यात् ।
(५) निगड़ाद्रिभिः । ख। (६) षसु । ख। (७) विविधान्तरे । ख।
(८) समासाद्य । ख।

(* वशयन्ति महादेवि ! (व !) साधका स्तत्त्वणादिमाम् ।)
एवमाकृष्टि सिद्धिश्चेत् साधकः कौलिको भवेत ॥ १० ॥
दीक्षिता न च योषा चेत् कथं स्यात् कुलपूजनम् (६) ।
कुलपूजा नचेद्वत्स ! कुलमन्त्राः पराङ्मुखाः (१०) ॥ ११ ॥
अन्ययोषा यदा वत्स ! स्वयं तस्या गुरु र्भवेत् ।
(वामकर्णे परां दद्यान्मन्त्रेणैवाभिषेचयेत् ॥ १२ ॥
मन्त्रं शृणु महादेव ! यथावत् कथयामि ते ।
वान्तान्ते(तु) त्रिपुरायै हृदयं परिकीर्त्तितम् ॥ १३ ॥
इमां शक्तिं पदान्ते च पवित्रं पदमुच्यते ।
ततो गुरुपदं दद्यात् ममशक्तिपदं ततः ॥ १४ ॥
कुरु स्वाहेति मन्त्रोयं षड्विंशत्यक्षरात्मकः ।
अनेन मनुना देवि (व !) शक्तिशुद्धिं समाचरेत् ॥ १५ ॥
अभिषेकाद्भवेच्छुद्धो रण्ड (रण्डाया) अतिभैरव !)
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा ॥ १६ ॥
वेश्या नापितकन्या च रजकी योगिनी तथा ।
विशेष-वैदग्ध्ययुता सर्व्वा एव कुलाङ्गनाः ॥ १७ ॥
चतुष्पथे वा नद्यां वा बिल्वमूले त्रिशूलके ।
प्रेतभूमौ बिल्वमूले हट्टे वा राजवेश्मनि ॥ १८ ॥
सिन्दूरेण लिखेद्यन्त्रं विपुलं साध्यदर्भितम् ।
तत्र संपूज्य विधिवत् कुलं कुलरसेन (११) च ॥ १९ ॥
तर्पयित्वा तदन्तःस्थं पूजयेन्निशि भावतः (१२) ।
ततो लक्षप्रदानेन सिद्धिदा स्ता भवन्ति हि ॥ २० ॥

(*) बन्धनीमध्यस्थं श्लोकार्द्धं ख पुस्तके नास्ति।

(६) कुलपूजकः । क । (१०) कुलपूजा पराङ्मुखा । ख ।

बन्धनीमध्यस्था चतुःश्लोको ख पुस्तके नास्ति।

(११) रसेन तु । ख । (१२) तर्पयित्वा तदन्ते हि प्रजपेन्निशिचारतः । ख।

पुरश्चरण-काले तु परयोषां प्रपूज्य च।
दीक्षितां वस्त्रपुष्पाद्यै भोज्यैः पायससम्भवैः ॥ २१ ॥
आरम्भकाले नियतं स्वयंपक्वान्नभोजनम् (१३)।
नानाविधं पिष्टकञ्च नानारस-समन्वितम् ॥ २२ ॥
दुग्धं दधि घृतं तक्रं नवनीतं सशर्करम्।
उपलाखण्डचूर्णञ्च नानाविध-रसायनम् ॥ २३ ॥
नारिकेलं कपित्थञ्च नागरं करमर्द्दकम् (१४)।
निम्बाकं वीजपूरञ्च दाड़िमीफलमेव च (१५) ॥ २४ ॥
नानारम्य-फलञ्चैव नानागन्धविलेपनम्।
चन्दनं मृगनाभिञ्च श्रीखण्डं नवपल्लवम् (१६) ॥ २५ ॥
टङ्कनं लोध्रकञ्चैव जलजं वनज न्तथा।
नाना-शैल-समुद्भुतं नानालङ्कार-भूषितम् ॥ २६ ॥
शून्यगेहे समानीय चार्घ्योदकविशोधितम्।
अमृतीकरणं कृत्वा शक्ती रभिमुखं नयेत् (१८) ॥ २७ ॥
अष्टकन्यारूपभेदं (१९) विलोक्यामर्ष-चेष्टितम्।
ब्रह्माण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः ॥ २८ ॥
आसनं प्रथमं दत्त्वा स्वागतञ्च ततः पुनः (२०)।
अर्घ्य-पानीयकं पाद्यं मधुपर्कं जलं तथा (२१) ॥ २९ ॥
स्नापयेद् गन्धपुष्पाद्यैः (२२) केशसंस्कार मेवच।
धूपयित्वा ततः केशान् कौषेयञ्च निवेदयेत् ॥ ३० ॥

---

(१३) अन्नालङ्कारलेपनम्। ख। प्रामादिकः।
(१४) नागरङ्ग सुदर्शनम्। ख।
(१५) निम्नाकं वीजपूरञ्च दाड़िमीफलमुत्तमम्। ख।
(१६) सुरपादपम्। ख।
(१७) नानाशैलसमुद्भूत नानालङ्कार सम्मितम्। ख।
(१८) शक्तिगेहमुखं नयेत्। ख।
(१९) अष्टकन्यारूपभावं। ख।
(२०) पुनः पुनः। ख। प्रामादिकः।
(२१) अर्घ्यं पाद्यञ्च पानीयं मधुपर्कं जलं ततः। ख।
(२२) गन्धपुष्पाभिः। ख।

ततः स्थानान्तरे पीठ मास्तीर्य्य पादुकाद्वयम् ।
दत्त्वा तत्र समानीय नानालङ्कार-भूषणैः ॥ ३१ ॥
भूषयित्वा नुलेपैश्च गन्धमाल्ये (२३) निवेदयेत् ।
तां तां शक्तिं समावाह्य मूर्द्धि तासां समानयेत् ॥ ३२ ॥
भोज्यं मण्डपमध्ये तु स्वर्णपात्रे सुशोभने ।
चर्व्व्य-चोष्यं लेह्यपेयं भोज्यं भक्ष्यं निवेदयेत् ॥ ३३ ॥
अदीक्षिताश्च त्ता स्तत्र ततो मायां निवेदयेत् ।
तासाञ्च सर्व्वकर्णेषु (२४) ततः स्तोत्रं समाचरेत् ॥ ३४ ॥
ॐमातर्द्देवि ! नमस्तेस्तु । ब्रह्मरूपधरेऽनघे ! ।
कृपया हर विघ्नं मे मम सिद्धिं प्रयच्छ मे ॥ ३५ ॥
माहेशि ! वरदे ! देवि ! परमानन्दरूपिणि ! ।
कृपया हर विघ्नं मे मम सिद्धिं प्रयच्छ मे ॥ ३६ ॥
कौमारि सर्व्वविद्येशि कुमारक्रीड़ने वरे ! ।
कृपयेत्यादि ॥ ३७ ॥
विष्णुरूपधरे ! देवि ! विनतासुतवाहि (ह)नि ।
कृपयेत्यादि ॥ ३८ ॥
वाराहि ! वरदे ! देवि ! दंष्ट्रोद्धृतवसुन्धरे ! ।
कृपयेत्यादि ॥ ३९ ॥
शक्ररूपधरे देवि ! शक्रादिसुर-पूजिते (२५) ! ।
कृपयेत्यादि ॥ ४० ॥
चामुण्डे ! मुण्डमालासृक्‌चर्च्चिते ! भयनाशिनि !
कृपयेत्यादि ॥ ४१ ॥
महालक्ष्मि ! महामोहे (२६) क्षोभ-सन्तापहारिणि ! ।
कृपयेत्यादि ॥ ४२ ॥

---

(२३) गन्धं माल्यं । ख ।
(२४) तासां सर्व्वेषु कर्णेषु । ख ।
(२५) गणपूजिते ? । ख ।
(२६) महामोक्षे । ख ।

पितृमातृन(म)ये ! देवि ! पितृमातृवहिष्कृते (४७) ।
एके वहुविधे ! देवि ! विश्वरूपे ! नमोऽस्तुते (४८) ॥ ४३ ॥
एतत् स्तोत्रं पठेद्यस्तु कर्म्मारम्भेषु संयतः ।
विदग्धां वा समालोक्य तस्य विघ्नं न जायते ॥ ४४ ॥
कुलीनस्य द्वारदेवाः (४९) कथिता स्तव पुत्रक !
दीक्षाकाले नित्यपूजा-समये नार्च्चयेद्यदि ॥ ४५ ॥
तस्य पूजाफलं वत्स ! नीयते यक्षराक्षसैः । (५०)

(कर्णजपस्तोत्रम्)

यदि क्रीड़ापरा स्तास्तु भोजयेत्तद्‌गृहाद्बहिः ॥ ४६ ॥
स्थित्वा स्तोत्रं पठेत्ताव द्यावत्तृप्तिः प्रजायते ।
आचम्य मुखवासादि-ताम्बूलञ्च निवेदयेत् ॥ ४७ ॥
ततो दद्यात् पुनर्माल्यं गन्धचन्दनपङ्किलम् ।
नमस्कृत्य विसृज्यैव वरं प्राप्य सुखी भवेत् (५१) ॥ ४८ ॥
अन्या यदि न गच्छन्ति निजकन्या निजानुजा ।
अग्रजा वा मातुलानी माता वा तत्सपत्निका ॥ ४९ ॥
वयसा जातितो वापि हीनापि परमाः कलाः (५२) ।
पूज्याः कुलवरैः सर्व्वै र्निजाहङ्कारवर्जितैः ॥ ५० ॥
सर्व्वाभावे एकतरा पूजनीया प्रयत्नतः । (५३)
संस्कृताऽसंस्कृता वापि जननी वापि निष्पतिः ॥ ५१ ॥

---

(४७) भिति मातृमये देवि ! भिति मातृवहिष्कृते ! । ख ।
(४८) एके वहुतरे देवि विश्वरूपे ! नमोस्तुते । क ।
(४९) कुलीन द्वारदेवाश्च कथितास्तवपुत्र । ख ।
(५०) "नीयते यक्षराक्षसै" रित्यतः परं क-पुस्तके "कर्णजपस्तोत्रम्" इति दृश्यते ।
(५१) विसृज्य प्रदक्षिणीकृत्य वरं प्राप्य सुखी भवेत् । क ।
(५२) हीना वा परमाः कलाः । ख ।
(५३) सर्व्वाभावे ध्येकतरा पूजयित्वा प्रयत्नतः । ख ।

पूर्व्वाभावे परा पूज्या मदंशा योषितो यतः । (५४)
एक श्चेत् कुलशास्त्रज्ञः पूजार्ह स्तत्र भैरव ! ॥ ५२ ॥
सर्व्व एव सुराः पूज्या ब्रह्मविष्णुशिवादयः (५५) ।
एका चेद्युवति स्तत्र पूजिता चावलोकिता ॥ ५३ ॥
सर्व्वा एव परादेव्यः पूजिता (ताः) कुलभैरव ! (५६)
आदावन्ते च मध्ये च लक्षपूर्त्ती विशेषतः ॥ ५४ ॥
न पूजयति चेत् कान्तां तदा विघ्नैः स लिप्यते । (५७)
पूर्व्वार्जितफलं नास्ति का कथा परजन्मणि ॥ ५५ ॥
तस्मात् सर्व्वप्रयत्नेन यदीच्छेदात्मनो हितम् ।
ममापि क्रोधसन्ताप-नाशनं (५८) विघ्ननाशनम् ॥ ५६ ॥
यत्नतः पूजनीयाः स्युः कुलाकुलजनाः स्वतः ।
प्रातरुत्थाय पूजायां स्नानकालेऽथवा पुनः ॥ ५७ ॥
संस्कृताऽसंस्कृता वापि हीनजातापि वा सुत ! ।
नमस्याः सर्व्वजातीनां कुलीनानां कुलार्च्चने ॥ ५८ ॥
पुरश्चरणकालेपि यदि स्यात् पीठदर्शनम् ।
तदा तत्र पीठपूजा मनसापि न हीयते ॥ ५९ ॥
देवीकूटे महाभागा मुड्डीयाने च भैरव ! ।
योगनिद्रां कामरूपे महिषासुरमर्द्दिनीम् ॥ ६० ॥
कात्यायनीं कामभूमौ कामाख्यां कामदायिनीम् ।
जालन्धरे च पूर्णेशीं पूर्णशैले च चण्डिकाम् ॥ ६१ ॥
कामरूपान्तु ठेहारे पूज्या दिक्करवासिनी ।
अथवा कामरूपस्य दर्शनं यदि भाग्यतः ॥ ६२ ॥

---

(५४) चासंख्या योषितो यतः । ख ।

(५५) सर्व्व एव सुराः पूज्याः सत्यब्रह्मसुरादयः । ख ।

(५६) पूजिता हि भवन्त्यत्र शक्तयः पूर्व्वशक्तयः । क ।

(५७) तदा विघ्नै र्विलुप्यते । ख । (५८) शमनं विघ्ननाशनं । ख ।

तदा (५९) भगादिदेवीनां पूजा तत्र विधीयते ।
कुलनाथं ततो ध्यात्वा स्वय मव्यग्रमानसः ॥ ६३ ॥
शेषं समापयेद्वत्स ! तदनुस्मृति-पूर्व्वकम् ।
पूजाकाले हीनजाता स्वयोषिद् वा प्रयत्नतः (६०) ॥ ६४ ॥
पूजनीया प्रयत्नेन द्वैधं तत्र विवर्जयेत् ।
यथा विष्णुः परं गोप्ता यथा च शम्भुरीश्वरः ॥ ६५ ॥
यथा कमलजन्मापि ये वा व्यास-मुखा द्विजाः ।
इन्द्राद्या लोकपालाश्च सर्व्वे गन्धर्व्वकिन्नराः ॥ ६६ ॥
यक्षरक्षः-पिशाचाद्या गुह्यचारण-खेचराः ।
ते यथा गोपितं गुह्यं तदुक्तं (त्वदुक्तं) शास्त्रसम्भवं ॥ ६७ ॥
तथा त्वयैव गोप्तव्यः कुलाचारः सुदुर्लभः ॥ ६८ ॥

इति कुलचूड़ामणौ तृतीयः पटलः ।

---

(५९) तदा दुर्गादिदेवीनां । ख ।
(६०) प्रयाति चेत् । ख ।

चतुर्थः पटलः ।

देव्युवाच ।

—:•••:—

शृणु पुत्र ! रहस्यं मे समयाचार-सम्भवम् ।
येन हीना न सिध्यन्ति जन्मकोटिशतैरपि (१) ॥ १ ॥
मानवः कुलशास्त्राणां कुलचर्य्यानुचारिणाम् ।
उदारचित्तः सर्व्वत्र वैष्णवाचार-तत्परः ॥ २ ॥
परनिन्दा-सहिष्णुः स्या दुपकाररतः सदा (२) ।
देवतायतने चैव (३) निर्जने शून्य-मण्डपे ॥ ३ ॥
चतुष्पथे जलमध्ये (४) यदि दैवाद् गति र्भवेत् ।
क्षणं ध्यात्वा मनुं जप्त्वा नत्वा गच्छेद् यथासुखम् ॥ ४ ॥
गृध्रं वीक्ष्य महाकालीं नमस्कुर्य्यादलक्षितः ।
क्षेमङ्करीं तथावीक्ष्य जम्बुकीं यमदूतिकाम् ॥ ५ ॥
कुरवं (रं) श्येनकाकौ तु (५) कृष्णमार्ज्जार मेव च ।
पूर्णोदरि ! महाचण्डे ! मुक्तकेशि ! बलिप्रिये !
कुलाचार-प्रसन्नास्ये ! नमस्ते शङ्करप्रिये !
श्मशानञ्च शवं दृष्ट्वा प्रदक्षिण मनुव्रजन् ॥ ७ ॥
प्रणम्यानेन मन्त्रेण मन्त्री सुख मवाप्नुते ।
घोरदंष्ट्रे ! कठोराक्षि ! किटिशब्द-प्रणादिनि ! ॥ ८ ॥
घोरघोररवे मात (६) र्नमस्ते चितिवासिनि ! ।
कृष्णपुष्पं रक्तवस्त्रं (७) विलोक्य त्रिपुरात्मिकाम् ॥ ६ ॥

---

(१) कुलाः कोटि सहस्रशः । ख ।
(२) उपकाररत स्तदा । ख ।
(३) पर्व्वते विपिने चैव । क ।
(४) चतुष्पथे कलामध्ये । क ।
(५) कुरवं श्येनभूकाकौ । क ।
(६) घोर घोररवास्फाले ! । ख ।
(७) रक्तवस्त्रां रक्तपुष्पां । ख ।

प्रणमे दण्डवद्भूमा विमं मन्त्र मुदीरयन् (८)।
बन्धूक-पुष्पसङ्काशे ! त्रिपुरे ! भयनाशिनि ! ॥ १० ॥
भाग्योदय-समुत्पन्ने ! नमस्ते वरवर्णिनि ! ।
कृष्णवर्णं तथा पुष्पं (९) राजानं राजपुत्रकम् ॥ ११ ॥
हस्त्यश्वरथशस्त्राणि फलकं वीरपूरुषम् (१०)
महिषं कुलदेवञ्च दृष्ट्वा महिषमर्द्दिनीम् ॥ १२ ॥
प्रणम्य जयदुर्गां वा स च विघ्नै र्न लिप्यते (११)।
जयदेवि ! जगद्धात्रि ! त्रिपुरेऽम्बे त्रिदैवते ! (१२)।
मद्य-भाण्डं समालोक्य मत्स्यं मांसं वरस्त्रियम् ॥ १३ ॥
दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृषे न्मनुम् (१४)।
घोरविघ्न-विनाशाय कुलाचार-समृद्धये ॥ १५ ॥
नमामि वरदे देवि ! मुण्डमालाविभूषिते ! ।
रक्तधारा-समाकीर्णवदने ! त्वां नमाम्यहम् ॥ १६ ॥
(सर्व्वविघ्नहरे देवि ! नमस्ते हरवल्लभे * !)।
एतेषां दर्शने वत्स ! यदि नैवं प्रकुर्व्वते (१५)।
शक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धि र्न जायते ॥ १७ ॥
एतेषां मारणोच्चाटं हिंसनं वागुरादिभिः ।
क्रियते यदि पापात्मा मद्भक्तः स कथं भवेत् ॥ १८ ॥
प्रधानांश-समुद्भूता एते कुलजनप्रियाः (१६)।
डाकिन्यश्च तथा सर्व्वा मदंशाः शृणु भैरव ! ॥ १९ ॥

---

(८) प्रणम्य दण्डवद्भूमा विदं स्तोत्र मुदीरयेत् । क ।
(९) कृष्णवस्त्रां कृष्णपुष्पां । क । (१०) फलकान् वीरपुरुषान् । ख ।
(११) न च विघ्नै र्विलुप्यते । ख । (१२) त्रिपुरादेवि देवदे ! । ख ।
(१३) महिषघ्नि ! नमोऽस्तुते । ख । (१४) विमृषन्मनुम् । क ।
* वन्धनी-मध्यस्थं ख-पुस्तके नास्ति ।
(१५) एतेषां दर्शने देवि ! (व !) यदि वैरं प्रकुर्व्वते । ख ।
(१६) कुलजमाश्रयाः । क ।

लब्धसिद्धि-समायोगा ड्डाकिनीर्हिंसनं यदि (१७)
(अथवा दानवानाञ्च मद्‌भक्तानां विशेषतः ।
वटुकानां भैरवाणां तस्य सिद्धि र्न जायते ॥ २० ॥
ग्रामे वा नगरे वाथ हट्टे वा चत्वरेपि वा ।
यं दृष्ट्वा युवति र्नारी पूर्व्वदोष-विवर्जिता) * ॥ २१ ॥
भावैक-भिन्नहृदया वक्रदृष्ट्या विलोक्य च (१८) ।
दृष्ट्वा (१९) मधुकरश्रेणी यथा मधुमदाकुला ॥ २२ ॥
पतत्यविरतं पद्मे यथा वामृतलोलुपा ।
चकोरी मेघ मासाद्य सोत्सुका चातक-प्रिया ॥ २३ ॥
नवप्रसूता धेनु र्वा यथा वत्सानुसङ्गिनी ।
नूतन-तृणजातेन यथा वा हरिणाङ्गना ॥ २४ ।
क्रव्यादाः पल मासाद्य तृष्णार्त्ता स्तोयदर्शनात् ।
मृणाल-दर्शना हंसी मधुलोभात् पिपीलिका ॥ २५ ॥
चञ्चला निजवंशाञ्च (चेद्) भावना मूढ़मानसा (२०) ।
उत्क्षिप्य भुजमूलञ्च (२१) वसनं क्षिप्यते पुनः ॥ २६ ॥
चेलाञ्चल-परीवर्त्त-दर्शितापघनाकुलां ।
कण्डूति (२२) भावव्याजेन शिथिलीकृत-वाससौ (२३) ॥ २७ ॥
दर्शितस्तनपर्य्यङ्क (न्त)-भूभागा पुनरावृता (२४) ।
स्खलत्पदयुगापात-पतिता पुन रुत्थिता ॥ २८ ॥

---

(१७) डाकिन्या हिंसनं यदि । ख ।
(*) बन्धनी मध्यस्थं श्लोकद्वयं क-पुस्तके नास्ति ।
(१८) बक्रदृष्ट्या विलोक्यते । क । (१९) दृष्ट्वा । ख ।
(२०) चञ्चला निजवंशांशं भावना गूढ़मानसा । ख । प्रामादिकः ।
(२१) भुजमूलस्य । ख । † अपघणोऽङ्गमित्यर्थः ।
(२२) कण्डूल । ख । (२३) वाससा । क ।
(२४) दर्शित-स्तनपर्य्यन्त-भागा वा पुनरावृता । क ।

सखीभि र्व्याज मासाद्य कर्णाकर्णि-मनोहरम् ।
एतच्चरणयुग्मे तु रहस्ये कामकल्पना (२५) ॥ २९ ॥
सखायं * पश्य सुश्रोणि शशाङ्कोऽस्य कुचोपरि ।
इत्यादिभावभरित-घृणालज्जा-विवर्जिता ॥ ३० ॥
कामासहिष्णुहृदया दूरे वा चान्तिके स्थिता ।
दूतीमुखेन लेखै र्वा (२७) जिज्ञासास्फुरिताधरा ॥ ३१ ॥
क स्त्वं कस्यासि पुत्रो वा कस्मादागत एव वा ।
किमर्थं किमनुष्ठाता किं वा तेऽभिमतं वद ॥ ३२ ॥
अङ्गुष्ठ-केशपर्य्यन्तं पीत्वापि च न शाम्यति ।
तदा तद्भावचतुरो भावबोध-छविर्भुजे ॥ ३३ ॥
तस्यां (२८) निजमनोहारि छविःशेषं विधाय च ।
तत्र स्थित्वा पुरःक्षोभं कुर्य्यात् काम इवापरः ॥ ३४ ॥
भौमवारे चितास्थाने कुलसिन्दूर मानयेत् (२९) ।
तेनैव कुलकाष्ठेन यन्त्रं कृत्वा तदन्तरे ॥३५॥
स्कें स्कें (३०) किटिकिटिद्वन्द्वं लिखेच्चण्डमनुं ततः ।
पत्रे महिषमर्द्दिन्या नववर्णं लिखेत्ततः ॥ ३६ ॥
तद्बाह्ये जयदुर्गाख्यां श्मशानभैरवीं ततः ।
लिखित्वा पूजयेद्रात्रौ भद्रकालीं समाहितः ॥ ३७ ॥
कामाख्यां दिशमास्थाय ध्यात्वा कामकलां (३१) तनुम् ।
दिग्वासा गलिताशेष-चिकुरः कुलकौलिकः ॥ ३८ ॥

---

(२५) एतत् प्रणययोगेन रहस्ये काम-कल्पिता । क ।
* लेखेयमिति पाठान्तरम् । शशाङ्कस्य कुचोपरि इति पाठान्तरम् ।
(२७) दूतीमुखेन स्वैरं वा । क । (२८) तस्या । ख ।
(२९) कुलकुम्भरसमानयेत् । ख । (३०) स्क्रें स्क्रें । क ।
(३१) कामाख्या-देशमास्थाय ध्यात्वा कामकलातनुम् । ख ।

"ध्यायेत् कालीं करालास्यां दंष्ट्रालीनविलोचनाम् (३२)।
स्फुरच्छव-करश्रेणीकृतकाञ्चीं दिगम्बरीम् ॥ ३९ ॥
वीरासनसमासीनां महाकालोपरिस्थिताम् (३३)।
श्रुतिमूलसमाकीर्ण-सृक्कनीं चण्डनादिनीम् ॥ ४० ॥
मुण्डमाला-गलद्रक्त-चर्च्चितां पीवरस्तनीम्।
मदिरामोदित (३४) (ता) स्फाल-कम्पिताखिलमेदिनीम् ॥४१॥
वामे खड्ग-खण्ड-(३५) मुण्ड-धारिनीं दक्षिणे करे।
वराभययुतां घोर-वदनां लोल-जिह्विकाम् ॥ ४२ ॥
शकुन्तपक्षसंयुक्त-वामकर्णविभूषणाम् (३६)।
शिवाभि र्घोर-रावाभिः सेवितां प्रलयोदिताम् (३७) ॥ ४३ ॥
चण्डहास चण्डनाद-चण्डास्फालै श्च भैरवैः।
गृहीत-नरकङ्कालै-र्जयशब्दपरायणैः ॥ ४४ ॥
सेविताखिलसिद्धौघसेविभिः सेवितां पराम् (३८)।
एवं तां कालिकां ध्यात्वा पूजयेत् कुलनायकः (३९) ॥ ४५ ॥
विना परपुरावेशविवरान्तःप्रवेशनम्।
यत् किञ्चित् कुलसिद्धिस्तु जायते न मनागपि ॥ ४६ ॥
सर्व्वसिद्धिप्रदा देवी हेलयापि च चिन्तिता (४२)।
अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते ॥ ४७ ॥
ततोऽष्टशतमामन्त्र्य सिद्धार्थं श्वेतसम्भवम्।
कालीमन्त्रेण साध्यादि-ग्रथितेन च भैरव ! ॥ ४८ ॥

---

(३२) दंष्ट्रानील-विलोचनाम्। क। (३३) महाकालोपवेष्टिताम्। ख।
(३४) मदिरामोदनो (ना) स्फाल। क। (३५) बामे खण्डाञ्च मुण्डञ्च। क।
(३६) शकुन्त-पक्ष-संसक्ता (क्तां) वालकर्णविभूषिताम्। ख।
(३७) शिवाभिः स्फेररावाभिः सेवितां प्रणवोदिताम्। क।
(३८) सेवितैः सेवितां पराम्। क। (३९) कुलसिद्धये। ख।
(४०) प्रवेशनाम्। ख। (४१) चित्तचिन्तिता। क।
(४२) शीतार्थं। ख। सिद्धार्थं इति सम्भवति।

विसृज्य देवीं हृदये स्थापयित्वा चतुष्पथे ।
वरालङ्कार-रचितो विशेत् परपुरं ततः ॥ ४९ ॥
देवीं ध्यात्वा द्वारदेशे नमस्कृत्य कुलं गुरुम् ।
सिद्धार्थं वामहस्ते तु गृहीत्वा मन्त्रमुच्चरन् ॥ ५० ॥
यत्र च द्वारि निगड़लौह-शङ्कुकुलावृतिः ।
भित्त्वा तत्र विशे द्द्रात्री (४३) निःशङ्कः क्षोभ-वर्जितः ॥ ५१ ॥
शतावृतिं समुल्लङ्घ्य विहरेत् स्वेच्छया ततः ।
अश्वागारे रथागारे कालिकागार-सन्निधौ ॥ ५२ ॥
देवतायतने वापि अञ्जनाञ्चित-लोचनः (४४) ।
ध्यात्वा स्वप्नवतीं विद्यां (४५) प्रविशेत् काममख्ड़पम् ॥ ५३ ॥
यदि कोपि समायाति न भयं तत्र चिन्तयेत् ।
के यूयमिति वक्तव्ये (४६) वयञ्च वीरपूरुषाः ॥ ५४ ॥
वक्तुं (४७) ग्रहीतुं स्मर्त्तुं वा न शक्ताः पुरपालकाः ।
तत्र प्रदक्षिणीकृत्य पितरौ परमास्पदम् ॥ ५५ ॥
पूजये द्यन्त्र मालिख्य निजं मन्त्रं जपेत्ततः ।
देवीकूटे तथोड्डाने (ड्डीने) कामरूपे तत-स्तटे (४८) ॥ ५६ ॥
जालन्धरे ततः पूर्णे यज्ञभूमौ ततः परम् ।
एषु विन्यस्य चक्राणि पूजयित्वा प्रणम्य च ॥ ५७ ॥
अष्टधा दशधा वापि शतं वापि सहस्रकं ।
जप्त्वा पीठं समादाय भाण्डागारं (४९) ततो विशेत् ॥ ५८ ॥
निर्म्मलां भूमि मास्थाय तत्र सिद्धासनं ततः ।
रक्षा-(५०) पीठं पुरस्कृत्य प्रणमेत् पीठ-संमुखम् ॥ ५९ ॥

---

(४३) भित्त्वा तत्र विशेद्द्वारि । ख ।
(४४) अञ्जनाञ्जित-लोचनः । क ।
(४५) स्वप्नवतीं देवीं । क ।
(४६) कोयमिति च वक्तव्ये । ख ।
(४७) नक्तं । क ।
(४८) कामरूपे ततः सुत ! । ख ।
(४९) भाण्डागारे । ख ।
(५०) जपा पीठं । ख ।

आगतासि महाभागे ! सिद्धयोने ! मदिष्टदे ! (५१) ।
कुलपूजां करिष्यामि उपचारं प्रयच्छ मे ॥ ६० ॥
पुत्राज्ञां मस्तके कृत्वा ततः साऽ गार मीक्षते (५२) ।
कुलपुष्पं (५३) तथा गन्धं नैवेद्यं पुन राहरेत् ॥ ६१ ॥
तद्वस्तावचितं सर्व्वं तेनैवोपस्कृतं ततः ।
समादाय तथा पूजां कृत्वा पक्का (५४) निजेच्छया ॥ ६२ ॥
शालि-तण्डुल मादाय मत्स्य-मांसानि चैव हि ।
घृतं मधु तथा चान्यद् (५५) यद्वा यत्रैव लभ्यते ॥ ६३ ॥
स्थापयित्वा ततः पात्रे परमोत्कल्य साधकः ।
निजेष्टदेवतां ध्यात्वा (५६) निवेद्य शास्त्रमार्गतः ॥ ६४ ॥
फलं छित्वा द्विधा भित्वा तस्यार्द्धं कुलशक्तये (५७) ।
निवेदयेत् स्वयञ्चार्द्धं भक्षयित्वा पुरःस्थितः ॥ ६५ ॥
यदि नो विद्यते (५८) योषा तत स्तोये विसर्जयेत् ॥ ६६ ॥
ततः पीठं समादाय भूमि-मार्जनपूर्व्वकम् ।
पितुः समीपे संस्थाप्य तत्त्वचिन्तापरो भवेत् ॥ ६७ ॥

इति कुलचूड़ामणौ चतुर्थ-पटलः ।

---

(५१) मदिष्टये । ख ।
(५२) पुत्राणांमस्तमे कृत्वा ततः सा गुरुमीक्षते । ख । प्रामादिकः ।
(५३) फलपुष्पं । ख ।   (५४) गत्वा । क ।
(५५) घृतं मधु तथान्यद्वा । क ।   (५६) स्मृत्वा । क ।
(५७) क्षणं स्थित्वा द्विधा भित्त्वा तदर्द्धं कुलशक्तये । ख ।
(५८) यदि तत्राद्यते शक्तरा । ख ।

पञ्चमः पटलः ।

श्रीदेव्युवाच ।

निद्रावशगते देव ! निशाचारिण साधकः ।
कामरूपं प्रविश्याशु कामाख्या-योनिमण्डपम् ॥ १ ॥
परिष्कृत्य (१) कुले द्रव्ये लिखित्वा चक्र मुत्तमम् ।
साध्यसाधक-नाम्ना च दर्भितं विपुलीकृतम् ॥ २ ॥
कामस्थं काममध्यस्थं कामेन च पुटीकृतम् ।
कामेन कामयेत् कामं कामं कामेन (२) योजयेत् ॥ ३ ॥
ततो ध्यात्वा मनुं जप्त्वा पीठादि चावलोक्य (३) च ।
मातृ-पीठे (४) पितृमुखं स्थापयित्वा विधानतः ॥ ४ ॥
गृहीत्वा वस्त्रखण्डं वा (५) ताम्बूलद्वयमेव वा ।
काकिणीं वा तदर्द्धं वा (६) तद्योग्यं हरते हटात् ॥ ५ ॥
प्रदक्षिण-क्रमेणैव क्रमेण निःसरेत्ततः ।
पौराङ्गनानां द्रव्यं वा परिरक्षतु (रक्षितु) रेव वा ॥ ६ ॥
गृहीत्वा यदि निर्याति भ्रष्टो भवति साधकः ।
तेषां प्रहार स्थातुर्य्यं व्यभिचार-कुलक्षतिः ॥ ७ ॥
क्रियते यदि दुष्टेन तदा नश्यति निश्चितम् (७) ।
व्यभिचारात् पुरक्षोभो बद्ध श्चैत्राभिभूयते (८) ॥ ८ ॥

---

(१) पुरस्कृत्य । क । (२) कामी कामेन योजयेत् । ख ।
(३) तत्र ध्यात्वा मनुं जप्त्वा पीठानि चावलोक्य च । ख ।
(४) मातृ पीठात् । क । (५) गृहीत्वा वस्त्रखण्डाद्या । ख । प्रामादिकः ।
(६) काकिनीं तदूर्द्धं वा । क । प्रामादिकः । (७) निश्चयात् । ख ।
(८) व्यभिचार पुरक्षोभे बन्धश्चैवाभिजायते । क ।

स्वप्नप्रबोधमन्त्रेण बोधयेत् पौर (पुरवासिनीम् (९) ।
अन्यचौरेण वा तेषां कुलीनेन च शङ्कर ! (१०) ॥ ९ ॥
प्रविश्य विघ्नः क्रियते (११) साधकस्य न संशयः ।
भूताः प्रेताः पिशाचा वा राक्षसा वा सरीसृपाः(१२) ॥ १० ॥
किन्नरी (१३) वा तथा नागकन्या पाताल-कन्यकाः ।
विद्याधरी भैरवश्च वटुको गणप स्तथा (१४) ॥ ११ ॥
प्रविश्य विघ्नं कुर्व्वन्ति सुप्ता दृष्ट्वा पुराङ्गनाः ।
अपत्यहानिं विक्षोभं व्याधिमुच्चाटनं तथा ॥ १२ ॥
द्रव्यहानिं व्याकूलत्वं कुर्व्वन्ति विघ्नहेतुकाः (१५) ।
एतत् पुरपते रेतत् कारणाद्यदि शङ्कर ! ॥ १३ ॥
त्वत्हानि र्यदा जयात् (१६) (जाता) तदा नश्यन्ति साधकाः ।
तस्मात् सर्व्वप्रयत्नेन प्रबोधं कारयेद्गुरुः (१७) ॥ १४ ॥
रक्षा कार्य्या प्रयत्नेन कीलकान्निखनेत्ततः ।
वज्रं शक्तिं तथा दण्डं खड्गं पाशं तथाङ्कुशम् ॥ १५ ॥
तत्तदिक् प्रतीनाञ्च (तद्दिक्पतीनाञ्च) पूजा कार्य्या प्रयत्नतः (१८) ।
पिष्टकं कदलं देव ! मोदकं पायसं तथा ॥ १६ ॥
भक्तं लाजं दंशनञ्च नारिकेलफलं ततः । ·
विष्णवे परमान्नञ्च गणेशाय च पीठकम् ॥ १७ ॥
मोदकं नारिकेलञ्च कदलीफलमेव च (१९) ।
देवेशाय क्षणाच्छागं दत्वा वीर मनुं ततः ॥ १८ ॥

---

(९) स्वप्नबोधक मन्त्रेण बोधयेत् पुरवासिनी य । ख ।
(१०) कुलान्येन च शङ्करः । क । (११) विघ्नं कुरुते । क । प्रामादिकः ।
(१२) भूताः प्रेता राक्षसाश्च सरीसृप देवकन्यका । ख ।
(१३) किन्नरी च । ख । (१४) हेतुकेशिगणस्तता । ख ।
(१५) विघ्नहेतुकम् । ख । (१६) दड़ाहानिर्यदा याति । क । (१७) गुरुम् । क ।
(१८) तत्र भाङ्गक पीताना पूजाकार्य्या विशेषतः । ख । प्रामादिकः ।
(१९) कदलीफल संज्ञकम् । क ।

जप्त्वा लोष्ट्रं समादाय क्षिपेद्दशसु दिक्षु च ।
यथा यज्ञेऽभिषिक्तोऽश्वे (२०) यथा शक्रादिभिः सुरैः ॥ १९ ॥
विघ्नमाचर्य्यते तद्वत् कुलोपरि महेश्वर ! ।
शयनागार ऐशाने कुलशङ्कं निधापयेत् ॥ २० ॥
ऊर्द्धं वितस्तिविस्तार मधो विस्तारमेव च ।
ज्ञात्वा तत्र यन्त्रराजं पूजयेन्निशि साधकः ॥ २१ ॥
रात्रौ पर्य्यटनञ्चैव रात्रौ च कुलपूजनम् (२१)
न करोति कथं देव ! साधकः कौलिको भवेत् ॥ २२ ॥
गृहस्थाश्रम मासाद्य प्रतिद्वारं समाहितः ।
रात्रौ स्थित्वा (२२) कुलाचारकथां त्रिभुवनेश्वरीम् ॥ २३ ॥
नत्वा च प्रजपेन्मन्त्रं पूर्व्वशक्ति र्यदा (२३) भवेत् ।
प्रातःस्नात्वा गुरुं नत्वा देवान् पितॄन् ऋषीं स्तथा ॥ २४ ॥
तर्पयित्वा यथाशक्ति पूजयेद् भक्तिभावतः ।
ततो युवतिसेवायां (या) यत्किञ्चिदुप (द्रप) (२४) देशतः ॥ २५ ॥
यथा पौराङ्गनालाप मिश्रणव्यपदेशतः ।
द्रव्यादिना (२५) तत्र वापि यथा भवति भैरव ! ॥ २६ ॥
दासदासी-प्रतिपालचारिणां (२६) प्रियकार्य्यपि ।
अस्योपरि कृपा तस्याः कीदृशी (२७) व्यपदेशतः ॥ २७ ॥
(ज्ञातव्या पुरभावस्तु यत्नतः कुलसाधकैः ।
केनापि व्यपदेशेन कुलचूड़ामणिं स्वतः) * ॥ २८ ॥

---

(२०) महायज्ञेभिषिक्तैश्च (क्तेच) । ख ।
(२१) शक्ति पूजनम् । क । (२२) कुलाचारे । ख ।
(२३) लिखित्वा पूजयेद्यन्त्रं पूर्व्वाशक्तिर्यदाभवेत् ।
(२४) ततः पुरपतेः सेवायत् किञ्चिद्व्यपदेशतः ॥ ख ॥ (२५) द्रव्यादीनां । क ।
(२६) दासदासीदत्तिदानचारीणां । ख । प्रामादिकः ।
(२७) अस्योपरिक्रमात्तस्य । क । प्रामादिकः ।
* वन्धनी मध्यस्थं वचनं ख-पुस्तके नास्ति ।

गृहीत्वा स्वर्णपात्रे वा ताम्रे वा कुलसंज्ञके ।
लिखित्वा निजयन्त्रं वा कुलयन्त्रमथापि वा ॥ २८ ॥
श्रीयन्त्रं वाथ गन्धर्व्वयन्त्रं वा द्रव्यवि (मि) श्रितम् (२८) ।
मध्ये तत् कुलनाम्ना च दर्भितं निजनामभिः ॥ ३० ॥
पार्श्वे कामकलावीजं निजमन्त्रेण वेष्टितम् ।
पूजयेत् साधकश्रेष्ठः कुलाम्नाय परायणः ॥ ३१ ॥
कुलपूजादिलिङ्गैस्तु रहितो विष्णुतत्परः (२९) ।
(गच्छन् स्वदन् नमन् वापि स्खलन् विष्णुपरायणः ॥ ३२ ॥
जय विष्णु (विष्णो !) हरे ! ब्रह्मन् नानाद्य (नामाद्य) पदविस्तरैः ।
स्मर्त्तव्योहं कुलाभिज्ञै ररण्ये वा जलाशये ॥ ३३ ॥
ततः पूर्व्वोक्तरूपेण कुलक्षोभं समाचरेत्) ।
ततो रात्रौ शून्यगेहे उद्याने वा सुरालये ॥ ३४ ॥
आनीय कुलजां देवीं मूलमन्त्रेण दीक्षयेत् ।
ततः पूर्व्वोक्तरूपेण कुलक्षोभं समाचरेत् (३०) ॥ ३५ ॥
एवं कृते न सिद्धि श्चेन्मूलमन्त्रं समभ्यसेत् ।
पीठानां परमं पीठं कामरूपं महाफलम् ॥ ३६ ॥
तत्र यत् क्रियते पूजा सकृदापि महेश्वर ! ।
विहाय सर्व्वपीठानि तत्र पुत्र वसाम्यहम् (३१) ॥ ३७ ॥
तस्माच्छतगुणं प्रोक्तं कामाख्या योनि-मण्डलम् ।
तेषां फलं महादेव ! वहु किं कथ्यतेधुना ॥ ३८ ॥
यत्र कोटिगणैः सार्द्धमाद्या महिषमर्द्दिनी ।
यत् पीठं ब्रह्मणो वक्तुं गुप्तं सर्व्वसुखावहम् ॥ ३९ ॥

---

(२८) श्रीयन्त्रं वापिगन्धर्व्वदुरापं द्रव्यमाश्रितम् ॥ ख ।
(२९) वाह्यतोविष्णुतत्परः । ख ।　　* वक्ष्यनीमध्यस्थोग्रन्थः क पुस्तके नास्ति ।
(३०) समारभेत् । क ।　　(३१) तस्माद्देहेवसाम्यहम् । क ।

यतो देवाश्च देव्यश्च ऋषयश्चैव (३२) भावजाः ।
सर्व्वेऽप्याविर्भवन्त्यत्र तेनगुप्तं महाकुलैः (३३) ॥ ४० ॥
द्विविधञ्चैव तत्पीठं गुह्यं व्यक्तं महेश्वर !
व्यक्ताद्‌गुह्यं महाद्‌धन्यं दुरापं साधकोत्तमैः ॥ ४१ ॥
गुप्तं सर्व्वत्र देवेश !   लभ्यते कुलसुन्दरैः ॥ ४२ ॥

भैरव उवाच ।

आकर्षणविधानं मे स्वतन्त्रं समुदीरय ।
पुत्रोऽस्मि यदि देवेशि ! सृष्टिसंहारकारिणि ! ॥ ४३ ॥

देव्युवाच ।

शृणु पुत्र !   महाविद्या माकर्षणकरीं पराम् ।
यदाराधनमात्रेण देवानाकर्षयेन्नरः (३४) ॥ ४४ ॥
ब्रह्मा सरस्वतीयुक्तो देवतासुखसंयुतः (३५) ।
वीरव्यक्ति (शक्ति) समाकीर्णः कालीमन्त्र उदाहृतः (३६) ॥ ४५ ॥
एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव ! ।
जप्त्वा कर्षयति स्वैरं स्थावरं (स्थावर) जङ्गमादिकम् ॥ ४६ ॥
एषा विद्या (३७) महाकाली गुह्याद् गुह्यतरा स्मृता ।
सुप्ता निद्रामिता मत्ता भ्रामितावनता तथा (३८) ॥ ४७ ॥
समस्तदोषजालेन ग्रथिता कुलसुन्दरी ।
निशाचारं दिवाचारं सन्ध्याचारञ्च पल्लवम् ॥ ४८ ॥
दर्भितं वीजसंयोगं भावयेद्योगमेव च ।

---

(३२) सुनयश्चैव । ख ।   (३३) सदाकुरु । ख ।
(३४) देवानाकर्षयेद्ध्रुवम् । ख ।
(३५) ब्रह्मा सरस्वतीगुप्ता देयतासुख-संयुता । ख । प्रामादिकः ।
(३६) वीजशक्तिसमाकीर्णं कालीमन्त्रमुदाहृतम् ॥ ख ॥
(३७) एतद्विद्या । क ।   (३८) विद्रावणरतापरा । ख ।

ज्ञात्वा प्रबोधयेद्वीरो गुरुरत्नैककारणम् (३८) ॥ ४८ ॥
नियमः पुरुषे ज्ञेयो न योषित्सु कथञ्चन ।
यदा तदा येन केन सर्व्वदा सर्व्वतोऽपि च ॥ ५० ॥
योषितां ध्यानयोगेन सिद्धयः स्यु र्न संशयः ।
यथा यस्कान्तमात्रेण गूढ़विद्यर्गिलोव्यक्तयः (चयः) (४०) ॥ ५१ ॥
स्वयमेव वह्निर्याति यथा वा सौरतेजसा ।
सूर्य्यकान्तः स्फुटरुचि र्यथा च रविरश्मिभिः (४१) ॥ ५२ ॥
चन्द्रकान्तं द्रावयति यथा वर्षासु वारिदैः (वारिदः) ।
जलसेकाभितप्ता भू रसपूर्णा प्रचक्षते ॥ ५३ ॥
(पुष्पदर्शनमात्रेण भक्तिमुक्ति र्यथा भवेत् ।
महादुर्गाप्रसादेन यथा सिद्धीश्वरो भवेत् ॥ ५४ ॥
कुलपुष्पप्रसादेन यथा प्रीति स्तु जायते ।
गङ्गास्मरणमात्रेण निष्पापो जायते यथा ।
यथा कर्षणमात्रेण शिव एव प्रजायते ॥ ५५ ॥
योषिच्चिन्तनमात्रेण यथेयं (४२) वरदायिनी) ।
तस्मात् सर्व्वप्रयत्नेन दीक्षयेन्निजकौलिकीम् ॥ ५६ ॥

---

(३८) गुरुरत्नैव कारणम् । क । (४०) गूढ़विद्यां प्रकाशयेत् । ख ।
(४१) सूर्य्यकान्तं स्फुटं रौति यथाच विधुरश्मिभिः । क । प्रामादिकः ।
(४२) तथेयं । क ।

क पुस्तकेतु "जलसेकाभितप्ताभू रिति श्लोकार्द्धात् परं

क्षुधार्त्तः क्षीरपाणेयत्तृप्तोभिजायते नरः ।
पुष्पा (पुष्प दर्शनमात्रेण गन्धर्व्वः स्वपितो (प्रीयते) यथा ॥
गुरु सेवन मात्रेण मन्त्रसिद्धिर्यथा भवेत् ।
महापद्मवनध्यानात् यथा सिद्धीश्वरो भवेत् ॥
त्रिपुराध्यानमात्रेण शक्ति मुक्तिर्यथा भवेत् ।

इति श्लोकद्वयं दृश्यते ।

भैरवोऽस्य ऋषिः प्रोक्त उष्णिक्छन्दस्तु देवता ।
कालिका दक्षिणा देवी चतुर्व्वर्गफलप्रदा ॥ ५७ ॥
पूर्व्वं वीजं पराशक्ति र्वीजेन मूर्त्तिकल्पना ।
षड्दीर्घभाजा वीजेन कुर्य्यादङ्गादिकल्पना (नाम्) ॥ ५८ ॥
चतुर्द्दश विभागेन * मातृकार्णैः पृथक् पृथक् ।
हृदये हस्तयोः पादयुगले विन्यसेत्ततः ॥ ५९ ॥
पश्चाच्छन्मूलमन्त्रेण व्यापकं विन्यसेत्ततः ।
पञ्चधा ध्यानमेकत्र पूर्व्वोक्तञ्च समाचरेत् ॥ ६० ॥
दशपञ्चारपद्मेषु † पीठ-पूजां समाचरेत् ।
तत्रावाह्य यजेद्देवीं दक्षिणां कुलभूषणाम् ॥ ६१ ॥
महाकालं यजेत् पश्चात् पीठशक्तिं ततो यजेत् ।
कालीं कपालिनीं कुल्लां प्रथमे च त्रिकोणके ॥ ६२ ॥
कुरुकुल्लां विरोधीञ्च विप्रचित्तां तथैव च ।
उग्रमुखी मुग्रप्रभां प्रदीप्ताञ्च तथैव च ॥ ६३ ॥
नीलां घनां ‡ बलाकाञ्च मात्रां मिताञ्च मुद्रिकाम् ।
ब्राह्याद्या स्तथा वाह्ये यजेत् पूर्व्वदले क्रमात् ॥ ६४ ॥
एवं कृत्वा जपेन्मन्त्रं हविष्याशी दिवा शुचिः ।
लक्षं रात्रौ तथालक्षं महाशौचपरायणः ॥ ६५ ॥
अन्यासां योषिताञ्चात्र न पूजा नापि चिन्तनम् ।
रात्रौ जपैकमात्रेण सिद्धिदा दक्षिणा भवेत् ॥ ६६ ॥
अङ्गन्यासं समाचर्य्य ध्यात्वा देवीं जपेद्बुधः ।
(अरण्यामथवा रात्रौ महाकाली महोदया ॥ ६७ ॥

---

* कृत्वं बीजेनैवशक्ति । ख । पञ्चदशविभागेन । ख ।
† दशधा योगपद्मेषु । ख ।
‡ घनां नीलां । क ।

अनेनैव विधानेन पूजिता विश्वरूपिणी ।
आकर्षयेद्देवकन्यां पाताले नागकन्यकाम् ॥ ६८ ॥
अरण्या च महाकाली द्वितीया चेयमीरिता ।
पूजा ध्यानं प्रयोगश्च जपश्चैव विशेषतः ॥ ६९ ॥
समानं सर्व्वमेतस्या स्तस्या देव्या प्रकीर्त्तितम् ।
वारिजापादिकं सर्व्वं पूर्व्वोक्तं चात्र कीर्त्तितम् ॥ ७० ॥
अरण्याय महाकन्याः पूजायां निर्मला भवेत्) * ।
श्मशाने शङ्कमासाद्य तत्र यन्त्रं विलिख्य च ॥ ७१ ॥
अष्टमीरात्रि मारभ्य चतुर्द्दश्यां समापयेत् ।
अष्टोत्तरशतं † मन्त्री मन्त्रयित्वा सुसंयतः ॥ ७२ ॥
नग्न स्ताम्बूलपूर्णास्यो मुक्तकेशो जितेन्द्रियः ।
मदिरा-घूर्णनयनः परयोषित्-समागमे ॥ ७३ ॥
पूजयेद् गन्धपुष्पेन दिग्वासाः कुलभूषणः ।
यन्नाम्ना दर्शितं यन्त्रं पूजयेद्वीर-वल्लभः ॥ ७४ ॥
सा समायाति कामार्त्ता यत्र देशे स पूजकः ।
मद्यं मांसं तथा वत्स ! यत् किञ्चित् कुलसाधनम् ॥ ७५ ॥
तस्यै दत्त्वा ततः शेषं गुरवे विनिवेद्य च ।
तदनुज्ञां मूर्द्ध्नि कृत्वा शेषञ्चात्मनि योजयेत् ॥ ७६ ॥
मद्यं मांसं विना वत्स ! कुलपूजां समाचरेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ॥ ७७ ॥
यत्रावश्यं विनिर्द्दिष्टं मदिरादान-पूजनम् ।
ब्राह्मण स्ताम्रपात्रेषु मधु मद्यं प्रकल्पयेत् ॥ ७८ ॥

---

* वन्धनी-मध्यस्था चतुःश्लोकी ख-पुस्तके न दृश्यते ।
अत्र पाठानामसङ्गतता प्रायेण प्रतिभाति ।
पुस्तकान्तराभावात् शोधनञ्च न सम्भवेत् ।

† अष्टोत्तर शतमर्घ्यं । ख ।

अथवा कुलमद्येन पूजयेत् कुलपूजितम् ।
योगिभिः पीयते मद्यं तन्मद्यं योगिपुङ्गवैः ॥ ७९ ॥
न मद्यं पानयोग्यं स्याद्यन्मद्यं गुड़पिष्टकम् ॥ ८० ॥

इति कुलचुड़ामणौ पञ्चमः पटलः ।

षष्ठः पटलः ।

—:●●:—

देव्युवाच ।

अथ वक्ष्यामि ते वत्स ! विधानं यत्र यद्भवेत् ।
आनीय देवीं तद्गात्रे व्यापकं विन्यसेत्ततः ॥ १ ॥
प्रथमं साधकश्रेष्ठो देवीकूटस्य मस्तके ।
(विलिख्य यन्त्रं पूर्व्वोक्तं पूजयेत् कुलवर्त्मना ॥ २ ॥
पीठादि देवीं प्रणमेत् पूजयेद् गन्धपुष्पकैः ।
महाभागां ततो मूलदेवी सावरणैः सह) * ॥ ३ ॥
लक्षैकं तत्र जप्त्वा (१) तु उड्डीयानं ततो विशेत् ।
तत्पीठे योगनिद्राख्यां (२) पूजयित्वा ततो यजेत् ॥ ४ ॥
निजेष्टदेवतां तत्र जपेल्लक्षं समाहितः ।
कामरूपं (३) ततो गत्वा ततः कात्यायनीं यजेत् ॥ ५ ॥
जप्त्वा लक्षं ततो रात्रौ कामाख्यां प्रथमं यजेत् ।
ततो जालन्धरे गत्वा पूर्णेशीं प्रथमं यजेत् ॥ ६ ॥
तत्रापि लक्षमानेन जप्त्वा मन्त्रं समाहितः ।
ततः पूर्णगिरौ गत्वा यजेच्चण्डीं ततो जपेत् ॥ ७ ॥
कामरूपान्तरे गत्वा (४) कामाख्यां प्रथमं यजेत् ।
ततः प्रान्ते महादेवीं (५) यजेद्दिक्करवासिनीम् ॥ ८ ॥

---

* बन्धनी-मध्यस्थः सार्द्धश्लोकः ख-पुस्तके नास्ति ।
(१) संपूज्य जप्त्वा देवेशि ! (श !) । ख ।
(२) ततः पीठयोगनिद्राम् । क ।
(३) कामरूपे । ख ।
(४) कामरूपान्तरे वत्स ! । ख ।
(५) वेहारे च महादेवीं । क ।

एवं पीठेश्वरीं जप्त्वा पूजयेदिष्टदेवताम् (६)।
सप्तपीठे सप्तलक्षं जप्त्वा रात्रौ समाहितः॥ ९॥
संख्यापूर्त्तौ ततः पृच्छेत् (७) का त्वं देवि! कुलोत्तमे।
एवं कृते विस्मृता चेत् (८) स्वनाम्नि गोत्रजन्मनि॥ १०॥
तवेष्टदेवतेवाहं वृणुष्व वरमुत्तमम् (९)।
ततः प्रणम्य देवेशीं वृणुयाद्वरमात्मनः॥ ११॥
यद्येवं नैव सा देवी (१०) पुनः पूर्व्वोक्त माचरेत्।
(अक्षोभित-कुलाचार-परिचर्य्या-परायणः) *॥ १२॥
अथवा सर्व्वपीठेषु यजेन्महिषमर्द्दिनीम्।
ततः प्रसन्ना भवति स्वैरं कुलवरप्रिया॥ १३॥
ततो जप्त्वा मूलमन्त्रं सर्व्वसिद्धीश्वरो भवेत्।
राजवृक्षं समालोक्य तन्मूले स्वेष्टदेवताम्॥ १४॥
पूजयित्वा महारात्रौ त्रिदिनं प्रजपेन्मनुम्।
लक्षपीठफलं देव! (११) लभते साधकोत्तमः॥ १५॥
वेतालं पादुकासिद्धिं खड्गसिद्धिञ्च भैरव!
अञ्जनं तिलकं गुप्तिं महिषासुरमर्द्दिनीम् (१२)॥ १६॥
साधयेत् साधकोऽभीष्टं (१३) मूलविद्यां महेश्वर! ॥ १७॥

भैरव उवाच।

वेतालादि-महासिद्धिः कथं भवति चण्डिके!।
तस्मे कथय देवेशि! (१४) यदि स्नेहोऽस्ति मां प्रति॥ १८॥

---

(६) पूजयित्वेष्टदेवताम्। क। (७) संख्यापूर्णे पुनः पृच्छेत्। क।
(८) एवं कृता विस्मृता चेत्। ख। (९) वृणुयाद्वरमुत्तमम्। क।
(१०) संप्रार्थितैव सा देवी। ख। प्रामादिकः।
(*) वन्धनी-मध्यस्थं श्लोकार्द्धं ख-पुस्तके नास्ति।
(११) अनभिष्टफलं देव। क।
(१२) महिषासुरमर्द्दिनी। क। (१३) साधयेत् साधकाभीष्टं। ख।
(१४) तत्त्वं कथय देवेशि।। ख।

देव्युवाच ।

निम्बवृक्षोद्भवं (१५) काष्ठं श्मशाने साधकोत्तमः ।
भौमवारे मध्यरात्रौ शवासन-युगाङ्किते (१६) ॥ १९ ॥
खनित्वा चाष्टलक्षं वै जपेन्महिष-मर्द्दिनीम् ।
तत्सहस्रं हुनेद्वत्स ! तत्रैव पितृकानने ॥ २० ॥
काष्ठमुद्धृत्य (१७) तत्रैव दण्डपादुक-चिह्नितम् ।
गत्वा दुर्गाष्टमी-रात्रौ श्मशाने निक्षिपेत्ततः ॥ २१ ॥
तस्योपरि शवं कृत्वा पूजयित्वा यथाविधि ।
शवासनगतो वीरो जपेदष्टसहस्रकम् ॥ २२ ॥
ततो मातृबलिं दत्त्वा काष्ठमामन्त्रयेत्ततः ।
स्फें स्फें दण्ड महाभाग योगिनी-हृदयप्रिय ! (१८) ॥ २३ ॥
मम हस्तस्थितो नाथ ! ममाज्ञां परिपालय ।
एवमामन्त्र्य वेतालं यत्र यत्र प्रयुज्यते ॥ २४ ॥
तं तं चूर्णीविधायाथ (१९) पुनरायाति कौलिकः ।
गच्छ गच्छ महाभागे ! पादुके ! वरवर्णिनि ॥ २५ ॥
मत्पादस्पर्श-मात्रेण गच्छ त्वं शतयोजनम् (२०) ।
अष्टलौहं समासाद्य (२१) पञ्चाशदङ्गुलाकृतिम् ॥ २६ ॥
खड्गं कृत्वा तत्र यन्त्रं लिखित्वा प्रजपेन्मनुम् ।
तत् सहस्रं ततो जप्त्वा (२२) महाशव-कलेवरे ॥ २७ ॥
खनित्वा वीजवृक्षाग्रे वह्निरक्षान्तु कारयेत् । (२३)
कुलाष्टम्या मर्द्धरात्रे चितामध्ये समाहितः ॥ २८ ॥

---

(१५) बिल्ववृक्षोद्भवं । ख ।
(१६) शवासनयुगाङ्किते । ख ।
(१७) काष्ठमुद्धृत्य तेनैव । ख ।
(१८) स्फें स्फें दण्ड महाभाग योगिनी हृदयप्रिय । क ।
(१९) तं तं तूर्णीं विधायाथ । ख ।
(२०) भ्रां भ्रीं भ्रं शत योजनम् । क ।
(२१) खड्गबाहं समालोक्य । ख ।
(२२) तत् सहस्रं ततो हुत्वा । ख ।
(२३) बद्ध्वा युग्मकन्तु भावयेत् । ख ।

प्रीतिपूर्व्वं समामन्त्र्य हुनेत् पितृवने ततः (२४)।
मधुरत्रयसंयुक्तं बिल्वपत्रेण संयुतम् ॥ २९ ॥
पादादिमूर्द्धपर्य्यन्तं होमान्ते बलिमाहरेत्।
बल्यन्ते परमा माया देवी महिषमर्द्दिनी ॥ ३० ॥
आयाति बलिपूर्णास्या वरहस्ता महोन्मुखी।
गृहाण वत्सेति शब्दे वै खड्गमुत्तोल्य धारयेत् (२५) ॥ ३१ ॥
घोरदंष्ट्रे! महाकालि! करवाल-स्वरूपिणि!।
क्राँ ईँ ऊँ कुरु कल्याण (२६) (णि) विपक्षच्छेद विस्तरम् ॥ ३२ ॥
एवमामन्त्र्य खड्गन्तु यमुद्दिश्य क्षिपेन्नरः।
छित्त्वा छित्त्वा पुनश्छित्त्वा गच्छत्याक्रम्यते पुनः ॥ ३३ ॥
अथवा कृष्णमार्जार मेकघातेन च्छेदयेत् (२७)।
कुञ्जे चतुष्पथे रात्रौ निखनेन्मन्त्रितं ततः ॥ ३४ ॥
तत्र मोचां समारोप्य यावत् पत्रं प्रजायते।
तावद् भुक्त्वा हविष्यान्नं प्रतिरात्रं जपेदभीः ॥ ३५ ॥
अष्टोत्तर-सहस्रन्तु एकाकी दीपवर्जितः।
उत्पन्नं पत्र मालोक्य (२८) चित्वा (छित्त्वा) निश्छिद्र मानयेत् ॥ ३६ ॥
तत्र भुक्त्वा हविष्यान्नं तद्दिने तटिनी तटे (२९)।
तमानीय सुहृत्सङ्गः चालयेन्मन्त्रमुच्चरन् ॥ ३७ ॥

---

(२४) प्रति सर्व्वं समामन्त्रा जुहुनेत् पितृवने ततः। इति क-पुस्तके। ख पुस्तके तु प्रीतिं पूर्व्वान्तु संपूज्य गच्छेद्गोत्रवने तत इत्येवं दृश्यते, उभयमेवासङ्गतम्। मया तु पुस्तक-द्वयात् विशुद्धांशमवलम्ब्य कल्पितः पाठो सूत्रे न्यवेशि। तथ्यन्तु जानाति भगवान् परम शिव एव।

(२५) खड्गमुत्तोल्य दापयेत्। क।

(२६) कञ्चित्त्वं कुरु कल्याणि। ख।

(२७) घातयेत्। ख।

(२८) तद्दृष्ट्वा पत्रमालोक्य। ख।

(२९) तटिनी जले। ख।

तच्छ्रोतोऽभिमुखं वत्स ! (३०) यदस्थि प्रतिगच्छति ।
तदानीय यजेत्तत्र कालिकां घोरनिस्वनाम् ॥ ३८ ॥
अभिमन्त्र्य सहस्रन्तु कालीमन्त्रं समाहितः (३१) ।
सिद्धाञ्जनो भवेन्मन्त्री नात्र कार्य्या विचारणा ॥ ३९ ॥
चन्दनागुरुकस्तूरी-मिश्रितं चास्थि-घर्षणम् ।
कृत्वा संपूज्य विधिवत् (३२) सर्व्वं जयति साधकः ॥ ४० ॥
कुलमीनं कुलान्नञ्च कुलमद्यं कुलेश्वर ! (३३) ।
कुलस्थाने समानीय दत्त्वा देव्यै प्रयत्नतः ॥ ४१ ॥
(अष्टोत्तर सहस्रन्तु जप्त्वा भूमितले स्थितः) * ।
भूमौ फुत्कारमन्त्रेण (मात्रेण) विवरं तत्र जायते ॥ ४२ ॥
शत-योजने दूरे वा यत्र साध्यस्थिति र्भवेत् ।
तत्रैव गमनं तस्य भूतलान्तः-प्रसर्पिणः ॥ ४३ ॥
एवं विवरमध्ये वा गवाक्षे कुहरेऽपि च ।
कायसङ्कोच मासाद्य गच्छत्यविकलो नरः ॥ ४४ ॥
दुर्गामन्त्रं विना वत्स ! कालीमन्त्रं तथैव च ।
सिद्धयः कुलनाथेश ! जायन्ते न कथञ्चन (३४) ॥ ४५ ॥

इति कुलचूड़ामणौ षष्ठः पटलः ।

---

(३०) यच्छ्रोतोऽभिमुखं वत्स । ख ।   (३१) कालीमन्त्रं समाहितः । ख ।
(३२) कृत्वा तिलकमादाय । ख ।
(३३) कुल मूल (मूलं) कुलद्रव्य कुलमद्यं महेश्वर ! । ख ।
* वन्धनी-मध्यस्थं क-पुस्तके नास्ति ।
(३४) जायन्ते न कदाचन । ख ।

सप्तमः पटलः ।

—∘∘∘—

भैरव उवाच ।

मातर्म्महिषमर्द्दिन्याः सङ्केतं कथयस्व मे ।
कुलाचारस्य संसिद्धैर भुक्तिमुक्ति-प्रसिद्धये (१) ॥ १ ॥

देव्युवाच * ।

सृष्टिस्थिति-विनाशाना मादिभूता महेश्वरी ।
गोप्या सर्व्वप्रयत्नेन शृणु तां कथयामि ते ॥ २ ॥
त्रैलोक्यवीजभूतान्ते सम्बोधनपदं ततः ।
सृष्टिसंहारकौ वर्णौ विद्या महिषमर्द्दिनी ॥ ३ ॥
अतिगुह्यतरा त्रित्या (नित्या) सृष्टिस्थिति-विधायिनी ।
सर्व्वदेव-सर्व्वसिद्धि-वीजभूत (ता) सनातनी ॥ ४ ॥
अत्यन्तगुरुभक्ताय शुद्धाय यदि कथ्यते ।
तदाष्टवर्णं वक्तव्यं न वीजं नापि साधनम् ॥ ५ ॥
साधारणी प्राणविद्या हृल्लेखा सिद्धिगोचरा ।
एतत् पूर्व्वस्थिता देवी गुरुसिद्धि-विनाशिनी ॥ ६ ॥
विशेषतः कलियुगे महासिद्धौघदायिनी ।
गुरूणां कुलनाशानां महाशाप-प्रदायिनी ॥ ७ ॥

---

(१) विद्या महिषमर्द्दिनी । क ।

* देव्युवाच इत्यादि अति गुह्यतरा नित्येत्यन्तो ग्रन्थः क पुस्तके नास्ति । परन्तु "मातर्म्महिष-मर्द्दिन्याः सङ्केतं कथयस्व मे" इत्यतः परं "कुलाचारस्य संसिद्धैर विद्या महिषमर्द्दिनी, अतिगुप्ता परा विद्या सृष्टिस्थिति-विधायिनी"ति दृश्यते ।

जया दुर्गाभया प्रोक्ता (२) परमा सिंहवाहिनी ।
त्रैलोक्यवीजभूतान्ते सा परा मर्द्दिनीकुलम् ॥ ८ ॥
वरं वह्निप्रिया देया (३) न देया नमसाहिता ।
दत्ता च परमा विद्या ङेयुता हृदयान्विता ॥ ९ ॥
सर्व्वत्र कुलशास्त्रज्ञ ! महाशाप-प्रदायिनी (४) ।
तस्मात् सर्व्वप्रयत्नेन गोप्तव्येयं नवाक्षरी ॥ १० ॥
अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः ।
नारदोऽस्य ऋषिः प्रोक्त श्छन्दो गायत्र मीरितम् (५) ॥ ११ ॥
देवता महिषघ्नीयं पूर्व्वं वीजं परापरा ।
ध्यायेत् कालीं महादैत्य-युद्धराग-महोन्मुखीम् ॥ १२ ॥
दक्षिणे चक्र-खड्गौ च वाणं शूलं तथैव च ।
वामे खड्गं तथा चर्म्म धनु स्तर्जन मेव च ॥ १३ ॥
विभ्रतीं काल-तीव्रोरु-महिषाङ्ग-निषेदुषीम् ।
पीताम्बरधरां देवीं पीतोन्नत-कुचद्वयाम् ॥ १४ ॥
जटामुकुट-शोभाढ्यां पितृभूमि-सुखावहाम् ।
ॐ महिष-हिंसके हूं फट् हृदयाय नमो हृदि (६) ।
ॐ महिष-शत्रो हूं फट् शिरस्युदीरितम् ॥ १५ ॥
ॐ महिषं हेषय हेषय हूं फट् शिखामन्त्रः समीरितः ॥ १६ ॥
ॐ महिषं हन हन हूं फट् कवच इत्यपि (७) ।
महिष-मर्द्दिनी हूंफट् अस्त्राणि शृणु भैरव (८) ॥ १७ ॥

---

(२) जयदुर्गाभया प्रोक्ता । क । (३) वरं वह्निप्रिया युक्ता । ख ।
(४) महाशाप-प्रणाशिनी । ख । प्रामादिकः ।
(५) छन्दो गायत्री समीरितम् ॥ ख ॥
(६) ओं महिषशत्रोः शार्च्चिहंफट् उदीरितः । क । प्रामादिकः ।
(७) ओं महिषं हनहन देवि हूं फट् कवचमित्यपि । क ।
(८) ओं महिषमर्द्दिनि हूंफड़स्त्राङ्गं शृणु भैरव ! । ख ।

अष्टपत्रे यजे देवी दु(र्दु)र्गाद्या दीर्घपूर्व्विकाः ।
आयुधानि पत्राग्राग्रे यादिभिः क्रमशो यजेत् ॥ १८ ॥
ब्रह्माख्याद्या * स्ततः पश्चाल्लोकपालां स्ततो वहिः ।
तदस्त्राणि सिद्धमन्त्री (८) प्रयोगञ्च समाचरेत् ॥ १९ ॥

प्रयोगे होमनियमः (१०) सहस्रं वसु-सम्मितम् ।
एषा विद्या महाविद्या न देया यस्यकस्यचित् ॥ २० ॥
यदि भाग्यवशा ल्लब्धा कुलदेवी कुलोत्तमैः ।
दीक्षिता कुलजाति स्तु सिद्धिदा सैव नान्यथा ॥ २१ ॥

भैरव उवाच ।

[महिषमर्द्दिनी-स्तोत्रम् ।]

मच्चित्ते चर चण्डि ! चूर्णित-दुराचार-प्रचण्डासुरे !
स्वैरं दारय भूरि-दुर्द्धर-दरद्रोहोर्म्मि-मर्म्मापदः ।
तेनायं निरुपद्रुतो निरुपम-श्रीपाद-पद्माटवी-
प्राप्तानन्तरसार्णवे मम मनोहंस श्चिरं नन्दतु [१] ॥ २२ ॥

हित्वा चण्डि ! हिरण्य-दारणपटु-प्रोद्दाम-हस्ताङ्गुलि-
स्फायत्-कम्र-सुमेरुसोदर-सटाटोपं नृसिंहं सुराः ।
मात स्त्वत्-पशुपाश-पेषणपटु-श्रीपाद-संसेविनं
सेवन्ते करिवैरिणं किमरिभि र्भीति र्भवेत् सेविनः [२] ॥ २३ ॥

चण्डि ! त्वद्विषयान्तराचरपदं श्रोत्रान्तर श्चेद् गतं
तत्तत्त्वं पुरुष-प्रकृत्यनुगतं ब्रह्मादिभि र्गीयते ।
तस्माद्देवि ! समस्त-दैवतसुधा-सारैकधाम-स्फुरत्-
श्रीमत्पादपयोज-चुम्बनपरं मामद्य सम्भावय [३] ॥ २४ ॥

---

* ब्राह्म्याद्याश्चेति तन्त्रसारे ।

(८) सिद्धमन्त्रः । ख ।   (१०) प्रयोगे होमसमये । ख ।

मन्निन्दा यदि वास्तु ते कुलपथाचाराद्वरं (११) मास्तु वा
कीर्त्तिः केशव-कौशिकार्चनचरी नैवास्तु मत्सन्निधिः।
मात र्ब्रह्महरि-स्मरारि-हुतभुग् दैत्यारि-सेवास्पद-
श्रीमत्-पादपयोज-चिन्तनविधौ चित्तं सदैवास्तु नः [४] ॥ २५ ॥

निर्द्दिष्टोऽस्मि यदि त्वदीय-पदयुक्-पूर्व्वापरी-भावने
निर्द्दिष्टस्य तदा ममापि विरलं किम्वास्तु सिद्धास्पदम्।
तस्माद्देवि ! कृपाभराञ्चिततरं श्रीपादपद्मद्वयम्
मच्चित्तेऽचतसम्पदि प्रसरतु क्षेमङ्करि ! क्षम्यताम् [५] ॥ २६ ॥

आत्मानं (१२) परिरभ्य भूतपति रप्युन्माद मासादितः
स्फारं जीवन-रक्षणे स च कृती नैवाभविष्यत् प्रभुः।
दैवाद्विच्युत-चन्द्र-चन्दनरस-प्रागल्भ्य-गर्भस्रव-
न्माध्वीपूर्ण-भवत्पदैक-कमलामोदेन नास्वादितः [६] ॥ २७ ॥

हाहा मात रनादि मोहजलधि-व्याहार-विद्राखिल-
ब्रह्मानन्द-रसाभिषेक-विरस-स्वान्तोदरे मादृशि।
युष्माकं सुरवृन्द-निर्भर-मनस्तापाभिभूतिक्षमः
श्रीमद्भक्तिरसातिदुर्दिन-परीवाहः सदा सर्पतु [७] ॥ २८ ॥

यत्पाद-स्फुरदंशुजाल-जठराञ्चण्डांशुकोटि-स्फुरत्-
स्वान्त-ध्वान्त-विसारि निर्म्मल-चिदानन्दत्वयं दैवतम्।
सर्गं संसृजति स्थितिं वितनुते सृष्टिं पुन र्लुम्पति
प्रोज्झिन्नाञ्जन-नीलनीरदमह श्चित्ते सदैवास्तु नः [८] * ॥ २९ ॥

---

(११) इयमिति क्वचित्। (१२) स्वात्मानं। पाठान्तरम्।

* तन्त्रसारे त्वेवं दृश्यते,—"तत्पाद-स्फुरदंशुजाल-जठराञ्चण्डांशु-कोटीस्खलद्-ध्वान्त-स्वान्त-बिसारि निर्म्मलचिदानन्दत्वयं दैवतम्। सर्गं संसृजते स्थितिं वितनुते सृष्टिं पुन र्लुम्पते प्रोज्झिनाञ्जन-नीलनीरदमहश्चित्ते सदैवास्तु नः॥"

या शश्वन्महिषच्छलस्फुटमिलद्गर्ज्ज्द्विधावत्स्खल-
द्दन्त्रान्त:-प्रसरत्तम-स्तमशिरो दैत्यं समालम्बते ।
सा दुर्गा भय-दुर्ग-दुर्गतिहरा लक्षान्तरत्नासिनी
दृप्यद्दैवतवैरि-दारणपटु जीयाज्जयाह्लादिनी [८] ॥ ३० ॥

नृत्यत्-खेटक-चामराञ्चल-बलच्चक्राद्यखर्वावर-
स्फायत्-सैन्यशिलीमुखोच्छलदनल्पाजिह्म-ताम्राम्बुधौ ।
झञ्झावात-विसर्पि-नर्त्तितशिर:-साटोप-दुष्टासुर-
त्रुय्यत्-खड्गविखण्डिताखिल-शकुन्तक्षुत्पिपासोज्ज्वले [१०] ॥ ३१ ॥

चञ्चत्-कम्प-विराम-कालकल-तीव्रास्फाल-सम्पादको-
न्माद्यन्माहिष-तिर्य्यगानतशिर:-शृङ्गान्तराले स्थले ।
वस्त्रैणं वैसुपत्र-मध्यकलिते व्वंध्वा श्रुती मातृभि:
सेव्ये चारु-रणाङ्गने रणमुदा घूर्णायमानाम्बरे * [११] ॥ ३२ ॥

ऊर्द्धाध:-क्रम-सव्यवामकरयो श्चक्रं दरं कर्त्तृकाम्
खेटं वाणधनु-स्त्रिशूल-भयहृन्मुद्रां दधानां शिवाम् ।
श्यामां नील-घनोच्च-कुन्तलचय-प्रोन्नद्धजूटां स्खलद्-
वीरास्फाल-लसत्-करालवदनां घोराट्टहासोद्भटाम् [१२] ॥ ३३ ॥

एवं ये तव देवि ! मूर्त्तिं मनघां ध्यायन्ति दुर्गादिभि:
शक्राद्यैरपि पूजितां परपुर-क्षोभादिकं कुर्व्वते ।
राज्यं शत्रुजय: सदर्थधिषणा काव्यामृतादर्शन-
स्तम्भोच्चाटन-मारणादि कृतिनां तेषां स्वयं जायते [१३] ॥ ३४ ॥

स्तोत्रं ते चरणारविन्दयुगल-ध्यानावधाना न्मया
मन्त्रोद्धार-कुलोपचार-रचितं † गूढ़ोपदिष्टं यदि ।

---

* घूर्णायमानां स्वरेदिति तन्त्रसारे । † चरितमिति कस्मिंश्चित्तन्त्रसारे ।

ये शृण्वन्ति पठन्ति देवि ! तरसा श्री-मोक्ष-कामादय
स्तेषां हस्तगता भवन्ति जगतां मात र्नम स्ते जय [१४] ॥ ३५ ॥

देव्युवाच ।

स्तोत्र-श्रवण-सन्तुष्टा प्रीतास्मि तव भैरव ।
पश्य मूर्त्तिं न च ध्यानयोग्यां मम सुखावहाम् ॥ ३६ ॥
एषा मूर्त्तिः प्रधानं मे कालीमूर्त्ति स्तथैव च ।
त्रिपुराभैरवी-मूर्त्ति राद्या सा परिकीर्त्तिता ॥ ३७ ॥
कुलवारे कुलाष्टम्यां चतुर्द्दश्यां विशेषतः ।
योगिनी-पूजनं तत्र प्रधानं कुलपूजनम् ॥ ३८ ॥
यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छित-प्रदः ।
तथा कुलतिथौ दुर्गा पूजिता वरदायिनी ॥ ३९ ॥
बिल्वमूले प्रान्तरे वा श्मशाने वापि साधकः ।
मांसप्रधानं नैवेद्यं सन्ध्याकाले विधीयते ॥ ४० ॥
काली कालीति वक्तव्ये तत्रोमा शिवरूपिनी ।
पशुरूपा समायाति परिवारगणैः सह ॥ ४१ ॥
भुक्ता रौति यदैशान्यां मुख मुत्तोल्य सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा कुलभूषण ! ॥ ४२ ॥
अवश्य मन्त्रदानेन नियतं तोषये च्छिवाम् ।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥ ४३ ॥
तथेयं कुलदेवीनां (१४) नित्यता कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्च्चयति निर्ज्जने ॥ ४४ ॥
शिवारावेण तस्याशु सर्व्वं नश्यति निश्चितम् ।
जपपूजा-विधानानि यत्किञ्चित् सुकृतानि च ॥ ४५ ॥

---

(१४) तथेयं कुलसेव्यानां । ख ।

गृहीत्वा शाप मापाद्य (१५) शिवा रोदिति निर्जने ।
एकया भुज्यते यत्र शिवया देव भैरव ! ॥ ४६ ॥
तत्रैव सर्व्वशक्तीनां प्रीतिः परम-दुर्लभा ।
पशुशक्ति र्नरशक्तिः पक्षिशक्ति स्तथैव च (१६) ॥ ४८ ॥
पूजिता विगुणं कर्म्म सगुणं कारयेत्ततः (१७) ।
तेन सर्व्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ॥ ४८ ॥
राजादि-भयमापन्ने (न्नो) देशान्तर-भयादिके (कं) ।
शुभाशुभानि कर्म्मानि विचिन्त्य बलि माहरेत् ॥ ४९ ॥
गृह्ण देवि ! महाभागे ! शिवे ! कालाग्निरूपिणि !
शुभाशुभफलं व्यक्तं (१८) ब्रूहि गृह्ण बलिं तव ॥ ५० ॥
एव मुच्चार्य्य दातव्यो बलिः कुलजनप्रियः ।
यदि न गृह्यते वत्स ! तदा नैव शुभं भवेत् ॥ ५१ ॥
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः ।
एवं मत्वा महादेव ! शान्तिस्वस्त्ययनं चरेत् ॥ ५२ ॥
कुलाचारं दक्षिणाख्यं कथितं तव सुव्रत ! ।
न कस्मैचित् प्रवक्तव्यं यदीच्छे च्छाश्वतं सुखम् ॥ ५३ ॥
निर्जने चैव वक्तव्यं न चैव जनसन्निधौ ।
न पितुः सन्निधाने वा न मातुः सन्निधौ तथा ॥ ५४ ॥
किंवा पक्षि-पतङ्गादि-दर्शने नैव कारयेत् ।
पाताल-मण्डपे वापि मण्डपे वा सुयन्त्रिते ॥ ५५ ॥
निश्छिद्र-मण्डपे वापि कर्त्तव्यं न च सन्निधौ ।
कुलपुष्पं कुलद्रव्यं कुलपूजां कुले जपम् (१९) ॥ ५६ ॥

---

(१५) मासाद्य । क ।　　(१६) पक्षि-शक्तिश्च भैरव । । क ।
(१७) सगुणं साधये त्ततः । ख ।
(१८) शुभाशुभ—फलव्यक्तिं । ख ।
(१९) कुलं जपं । ख ।

गुरुं कुलपतिं चापि कुलमालां (२०) कुलाकुलम् ।
कुलचक्रं कुलध्यानं सर्व्वथा न प्रकाशयेत् ॥ ५७ ॥
प्रकाशात् सिद्धिहानिः स्यात् प्रकाशाद्बन्धनादिकम् ।
प्रकाशा न्मन्त्रनाशः स्यात् प्रकाशादेव हिंसनम् ॥ ५८ ॥
प्रकाशा न्मृत्युलाभः स्या न्न प्रकाश्यं कथञ्चन ।
पूजाकाले तु देवेश ! यदि कोऽप्यत्र गच्छति ॥ ५९ ॥
दर्शये द्वैष्णवीं मुद्रां विष्णुन्यासं (२१) तथा स्तवम् ।
प्रकाशाद्यदि गुप्तिः स्यात्तत् प्रकाशा न्न दूषणम् ॥ ६० ॥
गोपनाद्यदि व्यक्तिः स्यान्न गुप्तिः साभिधीयते ।
कदाचिदङ्गहानि स्तु न च व्यक्तिः कदाचन ॥ ६१ ॥
(वरं पूजा न कर्त्तव्या न च व्यक्तिः कदाचन) ।
एतत्तन्त्रं (२२) गृहे यस्य कुलाचार-समन्वितम् ॥ ६२ ॥
कुलेश्वर-लिपि र्वापि तत्रैवाहं सदा स्थिता ।
तेषां गृहेषु पापानि दुष्कृतानि भयादिकम् ॥ ६३ ॥
पुस्तकस्थिति-मात्रेण नश्यन्ति नात्र संशयः ।
लिखित्वा कुलहस्तेन कुलद्रव्येण भैरव !
कुलवारे पठेद्वापि कुलहस्ते च धारयेत् ।
सर्व्वथा तस्य गेहं (२३) वै न संत्यक्ष्यामि भैरव ! ॥ ६५ ॥
अत्यन्तरोगयुक्तो वा शुभहीनोऽपि वा पुनः (२४) ।
एतत्तन्त्र-समायोगात्त्याज्यो न हि कथञ्चन ॥ ६६ ॥
कुलं कश्चित् समालोक्य लभ्यते कुल पूजनम् ।
एतद्ग्रन्थ-समायोगात् कपाली-करणं यदि ॥ ६७ ॥

---

(२०) कुलमानं । क । (२१) विष्णुन्यासं तयाचरेत् । ख ।
( ) बन्धनी-मध्यस्थं ख-पुस्तके नास्ति । (२२) एतद्तन्त्रः । ख ।
(२३) देहं वै । ख । (२४) अन्यरोगयुक्तोपि शुभहीनोपि वा पुनः । क ।

क्रियते साधकेन्द्रेण तदा किं वा न लभ्यते ।
संपूज्य कुल-देवञ्च (२५) गृह्णीयाच्चैव नान्यथा ॥ ६८ ॥
न स्नेहान्न च लोभेन न भीत्या करणा (कारणा) न्न च ।
राज्यहानि र्वरं वापि सुतहानिस्तु वा पुनः ॥ ६९ ॥
वित्तस्य हानि र्वा देवेश (२६) ! न प्रकाश्यं कदाचन ।
मन्मायामोहितश्चापि अन्यदेवरतोऽपि च ॥ ७० ॥
प्रकाशात् क्षोभ माप्नोति सत्यं सत्यं वदाम्यहम् ।
यथा योषि-च्छरीरेण विचरामि पुनः पुनः ॥ ७१ ॥
तथेमं ग्रन्थ मासाद्य तिष्ठामि परमा कला ।
महाचीनक्रमं वापि महानीलं सदाशिवम् ॥ ७२ ॥
सङ्केतं वापि योन्मत्तं यत् किञ्चिद्वीर-साधनम् ।
कुलाचारं विना वत्स ! नैव सिद्धि-प्रवर्त्तकम् ॥ ७३ ॥
कुलवारे कुलर्क्षे च कुललग्ने कुल-क्षणे ।
योगिनीनां मदा (सदा) पूजा मनसापि न हीयते ॥ ७४ ॥
कुलीनां वा (ना)वमन्येत नावज्ञां कारये द्बुधः (२७) ।
अभिभूति-समाकीर्णं व्याधियुक्तञ्च भैरव ! ॥ ७५ ॥
एतद्ग्रन्थेन निर्मुञ्छ्य पिच्छकोपरि धारयेत् । (२८)
सप्ताहं क्रमयोगेन मुक्तो भवति दुर्ग्रहात् ॥ ७६ ॥
एतत्ते कथितं वत्स ! देवीहृदय मुत्तमम् ।
न कस्मैचित् प्रयोक्तव्यं प्रवक्तव्यं कथञ्चन ॥ ७७ ॥
(इदानीं भव सर्व्वज्ञ सर्व्वतन्त्र-विशारदः ।
त्वमेव वक्ता शास्त्राणां न परोपि महेश्वर ! ॥ ७८ ॥

---

(२५) कुलदाम्पत्यम् । क ।   (२६) देव । क ।
(२७) कुलीनं वावमन्येत कुलज्ञां तत्र कारयेत् । ख ।
(२८) एतद्ग्रन्थेन निर्मञ्छेत् पिट्टकोपं विधारयेत् । ख ।
( ) बन्धनीमध्यस्था सार्द्धत्रिश्लोकी ख-पुस्तके नास्ति ।

गुरु स्त्वं सर्व्वतन्त्राणां नाहं नापि हरिः प्रभुः ।
कारणावस्थयापन्ना यद्यहं कुलरूपिणी ॥ ७९ ॥
न कार्य्यं नापि यत् किञ्चित् ब्रह्मोहं स्फुरत-(स्फुरित) प्रभम् ।
कार्य्यभाव-समापन्ना यदाहं विश्वरूपिणी ॥ ८० ॥
तदा त्वमेव तन्त्राणां वक्ता नाहं महेश्वर !) ।
अहं विशामि त्वद्देहे शक्त्या युक्तो भव प्रभुः ॥ ८१ ॥
मां विना जननी कापि नैव कार्य्य-विभाविनी ।
अतः कार्य्य (कार्य्ये) समुत्पन्ने पुत्रत्वं त्वयि वर्त्तते ॥ ८२ ॥
त्वां विना जनकः कोपि नैव कार्य्य-विभावकः ।
अत स्त्वमेव जनको नास्त्यन्योपि कथञ्चन ॥ ८३ ॥
कदाचित् पितृरूपोऽसि कदाचिद् गुरु-रूपधृक् ।
कदाचित् पुत्रतापन्नः कदाचिच्छिष्य एव हि ॥ ८४ ॥
शिवशक्तिसमायोगा ज्जायते सृष्टि-कल्पना ।
(शिवशक्तिसमायोगात् कुलादिमुक्ति-कल्पना) (२९) ॥ ८५ ॥
शिवशक्तिमयं सर्व्वं यत्किञ्चि ज्जगती-गतम् ।
तस्मा त्त्वमेव सर्व्वत्र सर्व्वत्राहं महेश्वर ! ॥ ८६ ॥
सर्व्वं त्वमेव देवेश ! सर्व्वश्चाहं सनातन ! ।
गुरु स्त्वं यदि शिष्योऽहं तदा मास्तु विवेचना (३०) ॥ ८७ ॥
तस्माद् भव गुरु र्नाथ ! शिष्याहं परमेश्वर ! (३१) ॥ ८८ ॥
इति कुलचूड़ामणौ सप्तमः पटलः समाप्तः ।

॥ समाप्तश्चायं ग्रन्थः ॥

---

(२९) एतत् क-पुस्तके नास्ति ।　　(३०) शास्त्र विचारणा । ख ।
(३१) तस्मा त्त्वमेव नाथस्त्व शिष्योपि परमेश्वरः । ख ।

सूचीपत्रम् ।

प्रथमः पटलः ।

द्वितीयः पटलः ।

भैरवं प्रति देवीवाक्यम्

तृतीयः पटलः ।

शुद्धिपत्रम् ।

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
५	५	चाम्नाया	चाम्नायाः
६	१३	कुलषिष्यो	कुलशिष्यो
७	१	मत्भूतं	मद्भूतं
१३	६	कुचावलम्	कुचाचलम्
१६	२३	महालच्मि	महालक्ष्मि
१८	८	जन्मणि	जन्मनि
२१	२१	प्रणन्य	प्रणम्य
२४	१८	गीयते	गीयते
२६	६	स्थापतित्वा	स्थापयित्वा
३४	८	इशाने	ईशाने
४८	२४	एतद्दत्त्वः	एतत्तत्त्वः
४६	१७	निर्मूञ्छ्रा	निर्मञ्छ्रा
५०	३	ब्रह्मोहं	ब्रह्माहं